Digitization by eGangotri-South Center

राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला - ३१५
शास्त्रपरिचयग्रन्थमाला- ३

मीमांसाशास्त्रप्रवेशिनी

प्रथमः भागः

प्रधानसम्पादकः

आचार्यः वि. मुरलीधरशर्मा

कुलपतिः

सम्पादकः

आचार्यः का.ई. देवनाथन्

प्रणेता

डा. श्रीरामः ए. एस्.

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

प्रथमवर्गीयमानितविश्वविद्यालयत्वेन
विश्वविद्यालयानुदानायोगेन अनुमोदितः
तिरुपतिः - 517 507 (आन्ध्रप्रदेशः)

2019

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ग्रन्थपरिचयः

सुविदितमेवेदं भगवता जैमिनिना प्रणीता मीमांसा नामातिगभीरं वेदाख्यज्ञानराशेः कर्म-काण्डस्यार्थनिर्णयार्थं प्रवृत्तं दर्शनमिति। दर्शने अस्मिन् जैमिनिशबरकुमारिलपार्थसारथिमाधव-खण्डदेवप्रभृतिभिः नैके प्रबन्धाः अग्रन्थिषत। एतादृक्सुविस्तृतशास्त्रप्रतिपाद्यार्थज्ञापनाय **मीमांसाशास्त्रप्रवेशिनी** इत्यभिधोऽयं सन्दर्भो विदितसंस्कृतानां मीमांसायां प्रविविक्षूणां सुलभ-प्रवेशाय, इदमिदानीं कृतप्रवेशानां शास्त्रावगमने सारल्याय, अन्तेवासिनां व्युत्पत्तिसंवर्धनाय च अस्मद्गुरूणां राष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिवर्याणाम् आदेशमनु मया व्यरचि। अस्य अध्ययनेन मीमांसाशास्त्रप्रवेशः सुखायते इत्यहमाशासे।

मीमांसाप्रवेशकामानभिलक्ष्य सन्दर्भोऽयं प्राकाश्यं नीयत इति धिया छात्रोपयोगितया पाठाध्ययनप्रयोजनानि, पाठस्थप्रधानविषयाः, पाठः, पाठसारः, अभ्यासाः अन्ते च परियोजना इत्ययं क्रमः समाश्रितः।

ग्रन्थेऽस्मिन् दर्शनानां परिचयः, मीमंसा-परिचयः, अष्टौ धर्मप्रमाणानि, द्वादशाध्याय-विषयाः, प्रत्यक्षादीनि लौकिकप्रमाणानि, द्रव्यादिप्रमेयाः, मीमांसाशास्त्रकाराः, विषय-परिचायकचित्राणि, अधिकविवरणम् इत्येते विषयाः प्राधान्येन सङ्कलिताः। अन्तेवासिनाम् आनुकूल्याय विभागद्वयोपेततया ग्रन्थोऽयं विभज्यते। आहत्य पञ्चचत्वारिंशत् पाठाः सन्ति। भगवतः वेङ्कटेश्वरस्य कृपया ग्रन्थोऽयं छात्रोपकारी भवेदिति प्रार्थये।

डा. श्रीरामः ए.एस्.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला - ३१५
शास्त्रपरिचयग्रन्थमाला - ३

मीमांसाशास्त्रप्रवेशिनी

प्रथमः भागः

प्रधानसम्पादकः
आचार्यः वि. मुरलीधरशर्मा
कुलपतिः

सम्पादकः
आचार्यः का.ई. देवनाथन्

प्रणेता
डा. श्रीरामः ए. एस्.

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः
(प्रथमवर्गीयमानितविश्वविद्यालयत्वेन विश्वविद्यालयानुदानायोगेन अनुमोदितः)
तिरुपतिः - 517 507 (आन्ध्रप्रदेशः)
2019

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मीमांसाशास्त्रप्रवेशिनी - प्रथम: भाग:

रचयिता

डा. श्रीरामः ए.एस्.

प्रथममुद्रणम् २०१९

प्रतिलिपयः १०००

© राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः (आन्ध्रप्रदेशः)

प्रकाशकः कुलसचिवः
राष्ट्रियसंस्कृतविद्यापीठम्
तिरुपतिः

ISBN : 978-81-937648-4-8

मूल्यम् : रू. २२०/-

मुद्रणम् - प्रजाशक्ति प्रिंटर्स एण्ड पब्लिषर्स प्राइवेट लिमिटेड्, तिरुपति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

Rashtriya Sanskrit Vidyapeetha Publication Series : 315
Sastra Parichaya Publication Series : 3

MĪMĀṂSĀ ŚĀSTRA PRAVEŚINĪ

Part I

General Editor
Prof. V. Muralidhara Sharma
Vice-Chancellor

Editor
Prof. K.E. Devanathan

Author
Dr. Shrirama A. S.

RASHTRIYA SANSKRIT VIDYAPEETHA
(Graded as First Category Deemed to be University
by University Grants Commission)
TIRUPATI - 517 507 (Andhra Pradesh)
2019

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

MĪMĀṂSĀ ŚĀSTRA PRAVEŚINĪ
Part I

Author
Dr. Shrirama A.S.

First Impression : 2019

Copies : 1000

© Rashtriya Sanskrit Vidyapeetha, Tirupati, A.P.

Publisher : Registrar
Rashtriya Sanskrit Vidyapeetha
Tirupati

ISBN : 978-81-937648-4-8

Price : Rs. 220/-

Printed at : Prajasakti Printers & Publishers Pvt. Ltd., Tirupati.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रवेशिनीमुद्दिश्य किञ्चित् . . . .

विरिवेण्टि.मुरलीधरशर्मा
कुलपति:

बहो: कालत: विद्याध्ययनप्रारम्भदशायां संस्कृतशिक्षणसरणिरासीत् मौखिक्येव । प्रारम्भे शब्दधातुकोशानां कण्ठस्थीकरणं, तत: पञ्चकाव्यपाठनं, ततश्च शास्त्राणां प्रारम्भिकग्रन्थानां लघुसिद्धान्तकौमुदी-तर्कसङ्ग्रहादीनाम् अध्यापनमिति क्रम: प्राय: समग्रदेशे प्रवर्तते स्म । प्रारम्भस्तर एव संस्कृतभाषाया: मूलभूतांशानाम् अध्यापनेन शास्त्रप्रवेश: सम्भवति सुकर इति संस्कृतशालासु शास्त्राध्यापनसरणिरियं प्रावर्तत पुरा ।

परमधुना संस्कृतशिक्षणसरणिरन्यादृश्येव । शालासु छात्रा: षष्ठकक्ष्यात: दशमकक्ष्यापर्यन्तं संस्कृतं भाषात्वेन पाठ्यपुस्तकमाध्यमेन अधीत्य शास्त्राध्ययनार्थं प्राच्यकलाशालासंस्कृतविद्यापीठादिषु प्रविशन्ति।

शालासु तैरधिगतं संस्कृतज्ञानम् अत्यल्पमेव । विद्यापीठादिषु तत्तादृशान् अल्पसंस्कृतज्ञान् छात्रान् विनैव शास्त्रपरिचयं शास्त्रमध्याप्यते। तादृशच्छात्रा: शालास्वधिगतेन अल्पसंस्कृतज्ञानबलेन न जात्वपि शास्त्रमधिगन्तुं पारयन्तीति स्थिति: तत्तच्छास्त्राध्यापकानाम् अनुभवैकवेद्या।

शास्त्राध्यापने सर्वत्र परिदृश्यमाना विलक्षणस्थितिरेवम् उपमीयेत।

तरणकौशलमधिगन्तुकामं प्रारम्भे तरणविषयकसिद्धान्तम् अध्याप्य तरणाभ्यासार्थं समुद्रे पातयामश्चेत् भवति यादृशी स्थितिस्तस्य तादृश्येव स्थितिरस्य सामान्यसंस्कृतज्ञानवत: छात्रस्य शास्त्राध्ययनस्य। तरणविषयक-सिद्धान्ताध्यापनात्परं तरणाभ्यास: तरणतडागे (Swimming Pool)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कारणीयः, न जात्वपि समुद्रे। तरणतडागे तरणाभ्यासः जलनिमज्जनजनित-प्राणभयोत्पादकत्वाभावात् तरणानन्दजनकत्वाच्च सुकरः तरणप्रेरकश्च। तथैव अल्पसंस्कृतज्ञानवतश्छात्रस्य शास्त्राध्यापनात्पूर्वं सरलरीत्या शास्त्रपरिचयः कार्यः, न तु शास्त्रं साक्षादध्यापनीयम्। अल्पविद्यापरिग्रहाणां सङ्क्षेपरुचीनाञ्च संस्कृतच्छात्राणां शास्त्राध्यापने अवश्यं फलदेति हेतोः सरणिरियमेव शरणीकरणीया । नान्या गतिर्विद्यते अयनाय ।

अतः पूर्वोक्तां देशव्यापिनीं संस्कृतशास्त्राध्ययनपरिस्थितिं सम्यगाकलय्य **संस्कृतशास्त्रप्रवेशिनीग्रन्थमालायाः** प्रकाशनं विद्यापीठेन प्रारब्धम् । तन्मालायामयं **मीमांसाशास्त्रप्रवेशिनीग्रन्थः** अन्यतमं पुष्पम्।

एतन्मालायां ग्रथितास्समेऽपि शास्त्रप्रवेशिनीग्रन्थाः ''यया रीत्या अस्मन्मनः सौकर्येण विषयान् गृह्णाति, चिरं स्मरति च तया विशिष्टरीत्या सन्ति प्रणीताः ।'' ग्रन्थस्याय वैशिष्ट्यानि इत्थं सन्ति ।

(1) प्रयोजननिर्देशः - प्रत्येकमपि पाठस्य प्रारम्भे पाठाध्ययनसमाप्तेः परं छात्रः यद्यज्ज्ञास्यति तत्सर्वं पूर्वमेव प्रयोजननाम्ना निर्दिश्यते । अनेन सः आत्मना अधिगमिष्यमाणं विषयमुद्दिश्य पूर्वमेव ज्ञास्यति। अनेन तन्मनः तत्पाठ्यविषयमेव केन्द्रीकृत्य प्रवर्तिष्यते।

(2) सारणीचित्रादिमाध्यमेन पाठ्यांशप्रस्तुतिः - पाठाश्च सारणीचित्रादि-माध्यमेन प्रस्तुताः, यद्दर्शनेन सारणीचित्रगताः पाठ्यांशाः चित्ररूपेण मनःपटले मुद्रितास्सन्तः चिरं स्मर्यन्ते । विभज्य अवगमनं संयोज्य च अवगमनमिति रीतिरत्र समाश्रिता । अनया पाठ्यांशावगमनं भवति सुकरम् ।

(3) विषयविभाजनम् - सम्पूर्णविषयस्य अपेक्षया खण्डशः विषयस्य अवगमनं स्मरणञ्च सुकरं भवतीति हेतोः विषयस्सर्वोऽपि खण्डशः विभक्तः क्रमशश्च प्रस्तुतः। नत्वत्र विषयस्सर्वोऽपि सामग्र्येण सातत्येन च निर्दिष्टः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(4) उदाहरणानि - प्रत्येकमपि पाठ्यांशस्य उदाहरणानि दत्तानि । अनेन पाठ्यांशस्य अवगमनं विश्लेषणञ्च सुकरम् ।

(5) पाठसारः - प्रत्येकं पाठस्य अन्ते प्रस्तुतः तत्सारः छात्रं न केवलं पाठ्यांशं पुनः स्मारयति अपि तु विस्तृतांशं सङ्क्षिप्य मनसि धर्तुञ्च अभ्यासयति ।

(6) अभ्यासाः - प्रत्येकस्मिन् पाठे प्रस्तुताः विविधाभ्यासाः छात्राणां विषयावबोधन-स्मरण-विश्लेषणादिबौद्धिकशक्तीः मूल्याङ्कयन्ति ।

(7) परियोजना - परियोजना तु अधीतविषयस्य विस्तृताध्ययनार्थम् अन्वेषणार्थं स्थलान्तरेषु नूतनस्थलेषु वा तत्प्रयोगपरीक्षणार्थं च छात्रान् प्रेरयति।

(8) वर्णरञ्जनम् - सूत्ररूपाणि वाक्यानि पेटिकायां वर्णरञ्जितानि विहितानि उदा - अथ अतः धर्मजिज्ञासा। एवं विधानेन तानि छात्रमनःपटले चित्ररूपेण अङ्कितानि भूत्वा चिरं स्मर्यन्ते ।

(9) भाषा - प्रायः सन्धिसमासरहितत्वात् भाषा सरला सुखबोध्या च । वाक्यरचनारीतिश्च मातृभाषावाक्यसरणिमनुसरति । सरणिरियं शीघ्रविषयावगमने सारल्यं वितनोति।

इत्थमत्र पूर्वोक्तविधया समग्रविषयनिरूपणं शिक्षामनोविज्ञान-सिद्धान्तान् आश्रित्य प्रवर्तत इति हेतोः **मीमांसाशास्त्रप्रवेशिनीयं** नितरां वैज्ञानिकी, मनोवैज्ञानिकी च ।अत एवेयं छात्रसमाकर्षिणी शास्त्राध्ययनप्रेरिणी च भविष्यतीति मे द्रढीयान् विश्वासः ।

ग्रन्थरचयिता डा. श्रीरामः ए.एस्. मत्सूचनामनु प्रत्येकमप्यंशं मदुक्तं सावधानम् अनुपालयन् ग्रन्थमेनं सुष्ठु प्राणैषीत् । नन्वयं नाम्ना वयसा च युवा परं वैदुष्येण, अध्ययनाध्यापननिष्ठया नितरां प्रौढो विदुषां वशंवदश्च।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रारम्भिकच्छात्राणां सुखबोधाय शास्त्रपरिचायकग्रन्थाः समारच्याः येन ते तत्तच्छास्त्रे सलीलं प्रवेशं प्रेरणां च लभेरन्निति मत्सङ्कल्पममुं रचयितायं सफलयतीति हेम्नः परमामोदः । एतद्ग्रन्थरत्नप्रणयनेन रचयितुरस्य उद्देशस्सकलोऽपि परिपूर्णो भवत्वित्याशासे ।

सम्पादकीयं समालिखन् नैकशास्त्रनदीष्णाः, वाग्मिनां प्राग्रहराः, परिशोधकपरिवृढाः दिगन्तयशसां नैकशास्त्रनदीष्णानां महामहोपाध्यायानां श्री ना. रामानुजताताचार्याणां शिष्योत्तमाः, अचार्य का. ई. देवनाथन् महोदयाः। तत्सम्पादकीयं ग्रन्थपरिचयं सुष्ठु प्रास्तौत् । तेभ्यो मदीयं कार्तज्ञ्यमाविष्क्रियते ।

मीमांसाशास्त्रप्रवेशिनीयम् आभारतं प्रतिष्ठितासु संस्कृत-शिक्षणसंस्थासु आदर्शमीमांसाशास्त्रपाठ्यपुस्तकरूपेण सुप्रथिता भविष्यतीत्यत्र न मे कोऽपि शङ्कालेशः ।

भगवान् सप्ताचलाधीशः पद्मावतीजानिः एतच्छास्त्रप्रवेशिनीपरम्परां प्रकामं प्रथितयशस्कां विदधात्विति तच्चरणपङ्कजयोः प्रणमन् विरमामि ।

जैमिनीयार्थसङ्ग्रन्थे सन्दृब्धा वेशिनी शुभा ।
सर्वमान्या विशिष्टैषा छात्राणां मोदमावहेत् ।।

विदुषां वशंवदः

मुरलीधरः

(वि.मुरलीधरशर्मा)

कुलपतिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सम्पादकीयम्

विदितमिदं समेषां भारतीयदर्शनशास्त्रनिष्णातानां तथा दर्शनविद्या-जिज्ञासूनां यत् भारतीयदर्शनेषु मीमांसा उत्कृष्टं स्थानमावहतीति। मीमांसाशास्त्रं लौकिकमर्यादामनुसृत्य प्रवृत्तमिति अस्मिन् शास्त्रे एव उक्तम्। लौकिकरीतिमनुसृत्य मीमांसान्यायाः निबद्धाः, यैः न्यायैः लोकोऽयं नीयमानोऽस्ति। अस्मिन् शास्त्रे चतुःषष्ट्युत्तरनवशतम् अधिकरणानि वर्तन्ते। तेषु अधिकरणेषु तादृक्सङ्ख्याकाः न्यायाः न्यरूपिषत। परं तु तत्र तत्र अधिकरणपूर्वपक्षेषु अपि न्यायाः नूतनतया निरूपिताः सन्ति। शास्त्रमिदं 'मीमांसासंज्ञकस्तर्कः' इति उक्तरीत्या न्यायबहुलं दृश्यते इत्यत्र नास्ति विप्रतिपत्तिः समेषाम्। मीमांसान्यायाः लौकिकरीतिं समाश्रिताः। अत एव निर्गलितान् एतान् न्यायान् आश्रित्य व्यवहाराः न्यायस्थाने प्रवर्तन्ते इत्यपि प्रसिद्धमेव। यथा -

'अत्यन्तबलवन्तोऽपि पौरजानपदाः जनाः।
दुर्बलैरपि बाध्यन्ते प्रबलैः पार्थिवाश्रितैः'।। इति।
'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' । इति।
'अन्तरं यादृशं लोके ब्रह्महत्याश्वमेधयोः।
विद्यते तादृगेवेदं विधानप्रतिषेधयोः'।।

इति वार्तिकश्लोकाः परामृश्यन्ते चेत्, तथा 'न पूतं स्यात् गोक्षीरं श्वदृतौ धृतम्', इत्यादिन्यायमालाकारिकाः परामृश्यन्ते चेत्, एवमेव शास्त्रदीपिकाभाट्टदीपिकादिग्रन्थस्थाः लोकनीतयः अवलोक्यन्ते चेत् अयं विषयः दार्ढ्यमियात्। व्यवहारेषु न्यायालये मीमांसान्यायानां महानुपकारः आसीत्, अस्ति च। अत एव हिन्दुधर्मशास्त्ररीत्या याज्ञवल्क्यादिस्मृतीः दृष्ट्वा यदा निर्णयः व्यधायि, प्रचीनकाले तदा मीमांसान्यायानां सञ्चारोपि वावदूकैः कृतः, सादरम् ऊरीकृतश्च निर्णायकैः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एतादृशं मीमांसाशास्त्रं भाट्टप्राभाकरप्रस्थानद्वयेन विभक्तं वरीवर्ति। जैमिनिप्रणीतानां सूत्राणां शबरस्वामिना कृतं विस्तृतं भाष्यमाश्रित्य प्रवृत्ते। इमे प्रस्थाने। कुमारिलभट्टपादाः भाष्यस्यास्य वार्तिकं विलिख्याप्रस्थान-विशेषमेकं निरमाषिषुः। अन्यत् प्रस्थानं प्रभाकरगुरूपज्ञं वर्तते। लघ्वी-बृहतीनामकटीकाभ्यां प्रथितम्। भाट्टप्रस्थाने भट्टसोमेश्वरपार्थसारथिमिश्र-गागभट्टखण्डदेववासुदेवदीक्षितप्रभृतयः महान्तः ग्रन्थरत्नानि अरीरचन्। प्राभाकरप्रस्थाने तु शालिकनाथभवदेवरामानुजाचार्यनन्दिकेश्वरप्रभृतयः बहवः ग्रन्थकाराः स्वीयं रचनाविलासं प्रादर्शयन्।

भाट्टप्रस्थाने अध्ययनम् अध्ययनविधिसिद्धमिति स्वीकृतम्। अपूर्वम् आक्षेपेण कल्प्यते इति च अङ्गीकृतम्। प्राभाकरमते अध्ययनम् अध्यापनविधिप्रयुक्तम्। अपूर्वं च विध्यर्थः इति स्वीकृतम्। भाट्टाः समवायं नाङ्गीकुर्वन्ति। प्राभाकराः तु समवायं स्वीकुर्वन्ति। यद्यपि चायं समवायः वैशेषिकोक्तसमवायात् भिन्नः। अनधिगताबाधितार्थविषयकं प्रमेति वदन्ति भाट्टाः। प्राभाकरास्तु अनुभूतिः प्रमेति लक्षयन्तः ग्रहीतग्राहिणीम् अनुमितिमपि प्रमात्वेन स्वीकुर्वन्ति। विपरीतख्यातिः अङ्गीकृता भाट्टमते। परन्तु प्राभाकराः यथार्थं सर्वमेवेदमिति प्रभाकरगुरोः मतम् इति वदन्तःसर्वं ज्ञानं यथार्थमिति आशेरते। तेषां हि मते शुक्तौ रजतमिति ज्ञानं विपरीतख्यातिः न। अत्र अग्रहीतभेदकं ज्ञानद्वयमेव स्वीक्रियते। एवं पदानि हि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि। अथेदानीं पदार्थाः अभिहितास्सन्तः वाक्यार्थमवगमयन्ति इति शाबरभाष्यम् व्याचक्षाणाः भाट्टाः पदाभिहिताः पदार्थाः एव वाक्यार्थकरणम्। अयम् अभिहितान्वयवादः इति वदन्ति। प्राभाकरास्तु इदमेव वाक्यं विवृण्वन्तः पदानाम् अन्विताभिधानवादं स्वीकुर्वन्ति। अन्वयांशेपि पदानां शाक्तिं स्वीकुर्वाणाः प्राभाकराः तन्मतं विस्तरेण उपपादयन्ति। एवमेव नियोगपदार्थविषये प्राभाकराणां पद्धतिः अत्यन्तं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विलक्षणः वर्तते। नियोगः अपूर्वम्, कार्यमिति पर्यायपदानि चेदपि प्रवृत्तिनिमित्तभेदं ते विशदीकुर्वन्ति। अपूर्वस्य प्रधानं कार्यमिति परिभाषां तेषां मते वर्तते।

'आत्मसिध्द्यनुकूलस्य नियोज्यस्य प्रसिद्धये।
कुर्वत्स्वर्गादिकमपि प्रधानं कार्यमेव नः।।'

इति कारिका प्रसिद्धा प्राभाकरमते। एवं प्रमाणविषये तत्र तत्र भाट्टप्राभाकरमतयोः वैलक्षण्ये सति, प्रमेयविषये तत्र तत्र वैलक्षण्यं निरूपितं वर्तते।

इदं पूर्वमीमांसाशास्त्रं द्वादशाध्यायात्मकम्। द्वादशलक्षणीति कथ्यमानं प्रसिद्धं वर्तते। लक्षणशब्दस्य अध्यायः इत्यर्थः। सङ्कर्षकाण्डनाम्ना प्रसिद्धेन अध्यायचतुष्टयेन सह षोडशाध्यायी इति प्रथितिः वर्तते। द्वादशाध्याय्यां -

'प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकः।
अधिकारोतिदेशश्च सामान्येन विशेषतः।
ऊहो बाधश्च तन्त्रं च प्रसङ्गश्चोदिताः क्रमात्'।।

इति उक्तरीत्या एकैकस्मिन् अध्याये प्राधान्येन एकः अर्थः निरूपितः इति द्वादशार्थानां प्राधेन्येन निरूपणं कृतं वर्तते। प्रथमाध्याये धर्मे अष्टौ प्रमाणानि, द्वितीयाध्याये कर्मभेदकप्रमाणानि, तृतीयाध्याये शेषलक्षणं निरूपितम्। चतुर्थाध्याये प्रयुक्तिविचारः निरूपितः। एवं क्रमविचारः, अधिकारविचारः, सामान्यातिदेशविचारः, विशेषातिदेशविचारः, ऊहविचारः, बाधविचारः, तन्त्रविचारः, प्रसङ्गविचारश्च निरूपितः अस्ति।

तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठेन ऐदंप्राथम्येन काञ्चित् समीचीनां विचारधारामाश्रित्य दर्शनानां सर्वेषां सरलीकृतभाषया छात्राणाम् उपकाराय

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

निरूपणं विधीयते। मान्यानां कुलाधिपतीनां पद्मभूषण नी गोपालस्वामि-महाभागानां तथा शाब्दिकप्रवराणां कुलपतीनां दक्षाध्यक्षाणाम् आचार्यमुरलीधरशर्मणां च प्रोत्साहतः एवैकस्यापि शास्त्रस्य परिचयात्मकग्रन्थाः विलिख्य प्रकाश्यन्ते। कठिनस्यास्य मीमांसाशास्त्रस्य सरलीकरणं दुःष्करं चेदपि तेषां महाशयानां प्रेरणया श्रीमान् आयुष्मान् श्री. डा. श्रीरामः ए एस् महोदयः श्रद्धया सावधानं च व्यदधात्। अत्र नवीनपद्धत्या शास्त्रस्य परिचयः व्यधायि। येन शिक्षकाः शिक्ष्यमाणाश्च विना परिश्रमं स्वसाध्यं साधयितुं क्षमेरन्। अहं पाठकान् प्रार्थये, अत्र अवहितमनसः भूत्वा लाभं प्राप्नुवन्तु। दोषाश्च यदि सूच्यन्ते ते भाविनिकाले परिष्क्रियेरन्। येन वयमपि उपकृताः भवेम इति आशासे।

आचार्यः का ई देवनाथन्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

किञ्चिन्निवेदनम्

आशा हीयं भुवने समेषां जनिमतामिष्टप्राप्तिर्मे भूयात्, अनिष्टपरिहारश्चेति। वरीवर्ति च लोके निखिलमपि शास्त्रं तदुपायबोधनार्थम्। दरीदृश्यते च सर्वोत्कृष्टतया सकललोकवन्द्यो महनीयः अपौरुषेयतया निर्दुष्टो वेद एव हि निरुपमं मुख्यं शास्त्रमिति। न ज्ञायते चायं वेदो मन्दमतिभिः यथावदर्थ-बोधकत्वेनेति प्रवृत्तानि तदङ्गान्युपाङ्गानि च। तत्र सुविदितमेवेदं भगवता जैमिनिना प्रणीता मीमांसा नामातिगभीरं वेदाख्यज्ञानराशेः कर्मकाण्डस्य अर्थनिर्णयार्थं प्रवृत्तं दर्शनमिति। दर्शनेऽस्मिन् जैमिनिशबरकुमारिल-पार्थसारथिमाधवाचार्यखण्डदेवप्रभृतिभिः नैके प्रबन्धाः अग्रन्थिषत। एतादृक्सु-विस्तृतशास्त्रप्रतिपाद्यार्थज्ञापनाय मीमांसाशास्त्रप्रवेशिनी इत्याख्योऽयं सन्दर्भो मीमांसायां प्रविविक्षूणां सुलभप्रवेशाय, इदमिदानीं कृतप्रवेशानां शास्त्रावगमने सारल्याय, अन्तेवासिनां व्युत्पत्तिसंवर्धनाय च मया व्यरचि। अस्य अध्ययनेन मीमांसाशास्त्रप्रवेशस्सुखायते इति मे मतिः।

अन्तेवासिनामानुकूल्याय विभागद्वयोपेततया ग्रन्थोयं विभज्यते। अयं च प्रथमः भागः, द्वितीयाध्यायविषयपर्यन्तः । द्वितीयभागे तृतीयाध्याय-विषयादारभ्य प्रकाश्यते ।

ग्रन्थस्यास्य प्रणयने मां प्रेरितवद्भ्यः अस्मद्गुरुभ्यः तिरुपतिस्थराष्ट्रिय-संस्कृतविद्यापीठस्य कुलपतिभ्यः आचार्येभ्यो वि.मुरलीधरशर्ममहोदयेभ्यो हार्दान् धन्यवादान् समर्पये।

ग्रन्थस्यास्य प्रणयने उपकृतवद्भ्यस्समेभ्यः **आचार्य का.ई. देवनाथन् महाभागेभ्यः, आचार्य वि. सुब्रायभट्टेभ्यः, आचार्य एन्. सूर्यनारायण-भट्टेभ्यः** गुरुभ्यश्च कृताञ्जलिरस्मि। विविधप्रमाणश्लोकाः, लक्षणानि वार्तिकन्यायमालामानमेयोदयादिग्रन्थेभ्यो मया सङ्कलितानि। अतः तत्तद्ग्रन्थप्रणेतृभ्यो नतमस्तकोऽस्मि।

अनेकगुरुसम्प्राप्तयत्किञ्चिज्ज्ञानसाधनः।
कृताञ्जलिर्भगवति ग्रन्थरत्नं समर्पये।।

डा. श्रीरामः ए.एस्.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विषयसूची

विभागः	विषयः	पुटसंख्या
१. प्रथमः परिच्छेदः	उपोद्घातः	१-४४
१. प्रथमः पाठः	१. दर्शनानां परिचयः	१-१२
२. द्वितीयः पाठः		१३-१८
	१. मीमांसाशब्दार्थः, २. मीमांसायाः नामान्तराणि	
३. तृतीयः पाठः		१९-२४
	१. मीमांसायाः आवश्यकता ३. मीमांसायाः परम्परा	
	२. मीमांसायाः प्राचीनता	
४. चतुर्थः पाठः		२५-३१
	१. सूत्रभाष्यवार्तिकानां लक्षणम् २. मीमांसायां प्रस्थानत्रयपरिचयः	
५. पञ्चमः पाठः		३२ - ३७
	१. मीमांसाप्रतिपाद्यविषयाणां परिचयः ३. अनुबन्धनिरूपणम्	
	२. मीमांसायाः विस्तृतिः ४. मीमांसायाः प्रयोजनम्	
६. षष्ठः पाठः		३८-४४
	१.अधिकरणस्वरूपस्य परिचयः २.सङ्गतेः परिचयः	
२. द्वितीयः परिच्छेदः	प्रथमाध्यायस्य विषयः	४५-११८
१. प्रथमः पाठः		४५-५०
	१. जिज्ञासासूत्रस्य विवरणम् ३. कर्मत्वविचारः	
	२. अध्ययनविधेः विचारः	
२. द्वितीयः पाठः		५१-५५
	१.धर्मलक्षणविचारः ३.धर्मसूत्रधर्मलक्षणयोः विरोधपरिहारः	
	२.स्वर्गलक्षणम्	

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. तृतीयः पाठः ५६-६०

१.वेदः २.वेदस्य विभागः ३.धर्मे प्रमाणानि

४. चतुर्थः पाठः ६१-६७

१.विधिः ३. उत्पत्तिविधिः

२. विधेः विभागः ४. गुणविशिष्टकर्मोत्पत्तिविधिः

५. पञ्चमः पाठः ६८-७७

१. निषेधः ३.तस्य व्रतमिति उपक्रमः ५. विकल्पे अष्टौ दोषाः

२.पर्युदासः ४. विकल्पप्रसक्तिः

६. षष्ठः पाठः ७८-८९

१. अर्थवादः ४.निषेधस्य शेषः

२.अर्थवादस्य भेदः ५.अर्थवादस्य भेदत्रयम्

३. विधेः शेषः ६.एकवाक्यता

७. सप्तमः पाठः ९०-९७

१.मन्त्रः २.विधित्रैविध्यम्

८.अष्टमः पाठः ९८-१०२

१.स्मृतिः, २.आचारः

९. नवमः पाठः १०२-१११

१.नामधेयम् २.नामधेये निमित्तचतुष्टयम्

१०. दशमः पाठः ११२-११७

१.वाक्यशेषः, २.सामर्थ्यम्

३. तृतीयः परिच्छेदः **द्वितीयाध्यायस्य विषयः** ११८-१५२

१. प्रथमः पाठः ११८-१२८

१.भावनाकरणत्वम्, २.भावना, ३.शाब्दी, ४.आर्थी

२. द्वितीयः पाठः १२९-१३५

१. अपूर्वम्, २.अपूर्वविभागाः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. तृतीयः पाठः १३६-१४२

१.यजिपदाभावेपि यागकल्पनम्

२.लिङाद्यभावेपि विधायकत्वम्

३.स्तोत्र-शस्त्र-मन्त्र-ब्राह्मण-ऋक् -साम-यजुः-
एकवाक्यत्वानां लक्षणानि

४. चतुर्थः पाठः १४३-१५२

१.भावनाभेदबोधकप्रमाणानि

परिशिष्टम् - १. रेखाचित्रम् I-VIII

२. विशेषविचारः IX-XVI

❀❀❀

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मङ्गलम्

निगमाय सुकर्मबोधिने मुनये जैमिनये च सूत्रिणे।
शबराय च भाष्यकारिणे नम ईशाय कुमारिलात्मने।।

भातु जैमिनिरमेशपादजा वल्गिता शबरशम्भुमूर्धनि।
श्रीकुमारिलभगीरथानुगा वाक्यशास्त्रसुरवाहिनी सदा।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रथमः परिच्छेदः
१. प्रथमः पाठः - दर्शनानां परिचयः

प्रथमपाठाध्ययनस्य प्रयोजनानि

१. वयम् एनं पाठं पठित्वा दर्शनस्य परिचयं प्राप्नुमः। २. दर्शनस्य भेदम् अवगच्छामः। ३. दर्शनस्य भेदकारणं जानीमः। ४. आस्तिक-दर्शनस्य परिचयं प्राप्नुमः। ५. नास्तिकदर्शनं जानीमः। ६. दर्शनेषु मीमांसायाः स्थानम् अवगच्छामः।

पाठे अन्तर्गताः प्रधानविषयाः



दृश्यते यथार्थज्ञानम् अनेन इति दर्शनम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दर्शनम्

'दर्शनम्' इति पदस्य अर्थः 'ज्ञानसाधनम्' इति। 'दृश्यते अनेन इति दर्शनम्'[१] इति दर्शनपदस्य व्युत्पत्तिः। यत् साधनं जीवात्मा, परमात्मा, जगत् इत्यादीन् पदार्थान् यथार्थतया ज्ञापयति, दर्शयति, समीक्षते वा तत् दर्शनं भवति।

तच्च दर्शनं द्विविधम्। आस्तिकदर्शनम्, नास्तिकदर्शनं चेति। यत् दर्शनं 'वेदः प्रमाणम्' इति अङ्गीकरोति, तत् आस्तिकदर्शनम्। यच्च दर्शनं 'वेदः प्रमाणम्' इति न अङ्गीकरोति, तत् नास्तिकदर्शनम्।



नास्तिकदर्शनं प्राधान्येन त्रिविधं भवति। चार्वाकम्, जैनम्, बौद्धं चेति। बौद्धेषु अपि चत्वारः अवान्तरविभागाः सन्ति। आहत्य नास्तिकदर्शनं षड्विधम् इति वक्तुं शक्यते।

दर्शनं नाम तत्त्वज्ञानस्य साधनम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



आस्तिकदर्शनं तु मुख्यतया षड्विधं भवति। साङ्ख्यम्, पातञ्जलम्, वैशेषिकम्, न्यायः, पूर्वमीमांसा, उत्तरमीमांसा चेति।



दर्शनम् आस्तिकनास्तिकभेदेन द्विविधम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आस्तिकदर्शनस्य सूत्रकृतः क्रमशः कपिलः, पतञ्जलिः, गौतमः, कणादः, जैमिनिः, व्यासः इति।

एवम् आस्तिकदर्शने प्रत्येकम् अध्यायाः कति सन्ति इति निरूपणम् अत्र क्रियते।

क्र.सं.	दर्शनम्	रचयिता	अध्यायाः
१	साङ्ख्यम्	कपिलः	षट्
२	योगः	पतञ्जलिः	एकः
३	न्यायः	गौतमः	पञ्च
४	वैशेषिकम्	कणादः	दश
५	मीमांसा	जैमिनिः	द्वादश
६	वेदान्तः	व्यासः	चत्वारः

सम्प्रति दार्शनिकानां विभागः, तद्द्वारा प्रकारान्तरेण दर्शनस्य विभागः च प्रदर्श्यते। नास्तिकाः प्रधानतया त्रिविधाः। तेषु अपि अवान्तरभेदाः भवन्ति। नास्तिकेषु बौद्धानां चत्वारः विभागाः सन्ति। प्राधान्येन आस्तिकदर्शनस्य त्रयः प्रकाराः भवन्ति। त्रिषु अपि विभागेषु प्रत्येकं विभागौ स्तः। आहत्य षट् आस्तिकदर्शनानि भवन्ति। एवम् आस्तिकदर्शनं नास्तिकदर्शनम् इत्युभयं षड्विधं भवति।

आस्तिकदर्शनस्य षट् प्रकाराः भवन्ति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



वेदः प्रमाणमिति अङ्गीकर्तारः आस्तिकाः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



नास्तिको वेदनिन्दकः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



दर्शनम् तत्त्वज्ञानस्य साधनम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रथमपाठस्य सारः

दर्शनानां परिचयः अस्मिन् पाठे कृतः। दर्शनं नाम तत्त्वज्ञानस्य साधनम्। दर्शनम् आस्तिकनास्तिकभेदेन द्विविधं भवति। दर्शनानां भेदे कारणं तु प्रमाणत्वेन वेदस्य अङ्गीकारः, प्रमाणत्वेन वेदस्य अनङ्गीकारश्च भवति। आस्तिकदर्शनम् एवं नास्तिकदर्शनं प्रत्येकं षड्विधम् अस्ति। आस्तिकदर्शनेषु अन्यतमं दर्शनं मीमांसादर्शनम्।

अभ्यासाः

१. एकाङ्कप्रश्नाः

अ. एकेन पदेन उत्तरत

१. प्रकृतपाठे निर्दिष्टः विषयः कः?

२. दर्शनपदार्थः कः?

३. दर्शनं कतिविधम्?

११. सांख्यस्य सूत्रकारः कः?

१२. योगस्य सूत्रकर्ता कः?

१३. न्यायस्य सूत्रकारः कः?

१४. वैशेषिकस्य सूत्रकारः कः?

१५. मीमांसायाः सूत्रकारः कः?

१६. वेदान्तस्य सूत्रकारः कः?

१७. सांख्ये कति अध्यायाः सन्ति?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१८. योगे कति अध्याया: सन्ति?

१९. न्याये कति अध्याया: सन्ति?

२०. वैशेषिके कति अध्याया: सन्ति?

आ. एकेन वाक्येन समाधत्त

१. दर्शनविभागौ कौ ?

२. आस्तिका: नाम के?

३. नास्तिका: नाम के?

४. नास्तिकानां प्रधानविभागा: के?

८. आस्तिकानां प्रधानतया विभागा: के?

९. आस्तिकानाम् अवान्तरविभागा: के?

१०. नास्तिकानाम् अवान्तरविभागा: के?

११. मङ्गलश्लोक: क:?

१२. मङ्गलश्लोकस्य किं प्रयोजनम्?

१३. दर्शनस्य किं प्रयोजनम्?

२. साधूत्तरं योजयत

१. सांख्यम्	अ) व्यास:
२. योग:	आ) जैमिनि:
३. न्याय:	इ) कणाद:
४. वैशेषिकम्	ई) गौतम:
५. मीमांसा	उ) पतञ्जलि:
६. वैदान्त:	ऊ) कपिल:

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. एकं पृथक् कुरुत

१. दर्शनेषु एतत् नान्तर्भवति

१) योगः ३) मीमांसा

२) न्यायः ४) व्याकरणम्

२. असम्बद्धं पृथक् कुरुत

१) चार्वाकः ३) जैनः

२) बौद्धः ४) सांख्यः

३. एकं निवारयत

१) योगाचारः ३) माध्यमिकः

२) चार्वाकः ४) वैभाषिकः

४. असम्बद्धं चिनुत

१) गौतमः ३) कणादः

२) कपिलः ४) भरतः

४. रिक्तस्थानं पूरयत

१. दृश्यते अनेन इति ....।

२. नास्तिकाः वेदस्य प्रामाण्यं ....।

३. आस्तिकदर्शनानि ....सन्ति।

४. नास्तिकदर्शनानि प्रधानतया......सन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

५. पञ्चाङ्कप्रश्नाः

१. दर्शनपदार्थः कः, तद्विभागाः के ?

२. आस्तिकदर्शनं विशदयत ?

३. नास्तिकदर्शनं स्पष्टयत ?

४. दर्शनस्य अध्यायविभागान् स्पष्टयत ?

५. दर्शनप्रणेतुः परिचयं दत्त ?

६. दार्शनिकानां विभागद्वयं किमर्थं सञ्जातम् ?

६. दशाङ्कप्रश्नः

१. दर्शनस्वरूपं निरूपयत ?

परियोजना

विविधग्रन्थेषु विद्यमानं मङ्गलश्लोकं सङ्कलयत ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वितीयपाठाध्ययनस्य प्रयोजनानि

१. वयम् एनं पाठं पठित्वा 'मीमांसा' इति पदस्य परिचयं प्राप्नुमः। अर्थं च अवगच्छामः। २.'मीमांसा' इति पदस्य निष्पत्तिं जानीमः। ३. मीमांसाशास्त्रस्य विविधनाम्नां परिचयं प्राप्नुमः। ४. मीमांसायाः नानानाम्नां सत्त्वे कारणम् अवगच्छामः।

पाठे अन्तर्गताः प्रधानविषयाः





मीमांसया वेदवाक्यानाम् अर्थनिर्णयः क्रियते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. द्वितीयः पाठः - १. मीमांसाशब्दार्थः

मीमांसा नाम पूजितविचारः। धर्मे प्रमाणं वेदः[२]। तादृशवेदवाक्यानाम्, धर्माधर्मयोः च विचारः क्रियते इति मीमांसायाः पूजितत्वं सम्भवति। 'मान पूजायाम्'[३] इति पूजार्थकः 'मान' इति धातुः अस्ति। तस्मात् धातोः जिज्ञासार्थे 'सन्' इति प्रत्यये कृते 'मीमांसा'[४] इति शब्दस्य निष्पत्तिः भवति। जिज्ञासा तु पुरुषेण कर्तुं न शक्यते। अतः जिज्ञासापदस्य विचारार्थे लक्षणा स्वीक्रियते। तथा च मीमांसा इति शब्दस्य अर्थः 'पूजितविचारः'[५] इति भवति।

मीमांसा	=	मान + सन्
मीमांसा	=	पूजा + जिज्ञासा
		पूजित + जिज्ञासा
		पूजित + विचारः
मीमांसा	=	पूजितविचारः

मीमांसाशब्दः, जिज्ञासाशब्दश्च लक्षणया विचारार्थकौ एव। अतः धर्ममीमांसा - धर्मजिज्ञासा, कर्ममीमांसा - कर्मजिज्ञासा, ब्रह्ममीमांसा - ब्रह्मजिज्ञासा इत्यादिना व्यवहारोऽपि सङ्गतः भवति।

२. मीमांसायाः नामान्तराणि

मीमांसायाः प्राचीनतमं नाम न्यायशास्त्रम् इति। तन्त्रम्, तर्कः, वाक्यशास्त्रम्, धर्मशास्त्रम्, कर्ममीमांसा, धर्ममीमांसा, विचारशास्त्रम्, द्वादशलक्षणी, अध्वरमीमांसा, द्वादशाध्यायी, पूर्वमीमांसा इति च नामान्तराणि विद्यन्ते।

मीमांसा नाम पूजितविचारशास्त्रम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मीमांसायां विशेषतया वेदवाक्यानामेव विचारः क्रियते। वेदवाक्यार्थस्य निर्णयार्थं प्रवृत्तं शास्त्रं मीमांसाशास्त्रम्। अतः एव मीमांसायाः 'वाक्यशास्त्रम्', 'विचारशास्त्रम्' इति नाम सङ्गच्छते। मीमांसायां विचारपुरस्सरं वेदार्थाः निश्चीयन्ते। अतः मीमांसायाः 'तर्कः' इति नाम। धर्मस्य विचारः मीमांसायां प्रवर्तते। अतः 'धर्ममीमांसा' इति नाम समागतम्। अध्वरशब्दस्य अर्थः यागः। मीमांसायां प्राधान्येन यागादिकर्मणां विचारः भवति। अतः 'कर्ममीमांसा', 'अध्वरमीमांसा' इति मीमांसायाः नाम भवति। मीमांसायां द्वादशाध्यायाः सन्ति। अतः मीमांसायाः 'द्वादशाध्यायी', 'द्वादशलक्षणी'[६] इति नाम युक्तं भवति। वेदस्य पूर्वभागस्य नाम कर्मकाण्डम् इति। तादृशपूर्वभागं मीमांसा विचारयति। अतः 'पूर्वमीमांसा' इति नाम सङ्गतं भवति। वेदार्थान् विस्तारयति, अस्मान् रक्षति इति 'तन्त्रम्' इति नाम।

	नामानि	नाम्नः कारणम्
मीमांसा	१.तन्त्रम्[७]	वेदार्थानां विस्तारणात्
	२.तर्कः[८]	वेदार्थविचारस्य प्रतिपादनात्
	३.वाक्यशास्त्रम् ४.विचारशास्त्रम्	वेदवाक्यानां विचारणात्
	५.धर्मशास्त्रम् ६.कर्ममीमांसा ७.धर्ममीमांसा ८.अध्वरमीमांसा	धर्मरूपयागादिकर्मणः विचारात्
	९.द्वादशाध्यायी १०.द्वादशलक्षणी	द्वादशसंख्याकाः अध्यायाः सन्तीत्यतः
	११.पूर्वमीमांसा	वेदस्य पूर्वभगस्य विचारणात्

पदवाक्यप्रमाणशास्त्रेषु वाक्यशास्त्रं नाम मीमांसा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वितीयपाठस्य सारः

मीमांसा इति शब्दः मान इति धातोः निष्पन्नः। मानधातुः पूजार्थे प्रयुक्तः। पूजितविचारः इति मीमांसाशब्दस्य अर्थः। मीमांसया वेदवाक्यानां विचारः क्रियते। अतः प्राधान्येन मीमांसायाः नाम वाक्यशास्त्रमिति।

अभ्यासाः

द्वितीयः पाठः

१. एकाङ्कप्रश्नाः

अ. एकेन पदेन उत्तरत?

१. मीमांसा इति पदस्य अर्थः कः?
२. धर्मं प्रति परमं प्रमाणं किम्?
३. मान् धातुः कस्मिन् अर्थे प्रसिद्धः?
४. जिज्ञासार्थे कः प्रत्ययः विहितः?
५. जिज्ञासा इति पदस्य कस्मिन् अर्थे लक्षणा?
६. मीमांसापदं कस्मात् धातोः उत्पन्नम्?
७. मीमांसायां कति अध्यायाः सन्ति?
८. मीमांसायाः अपरं नाम किम्?
९. मीमांसा इत्यत्र सन् प्रत्ययार्थः कः?
१०. मीमांसा इत्यत्र सन् प्रत्ययस्य लक्ष्यार्थः कः?
११. मीमांसा कस्य वेदभागस्य अर्थनिरूपणाय प्रवृत्ता?
१२. अध्वरपदार्थः कः?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आ. एकेन वाक्येन समाधत्त

१. जिज्ञासा पुरुषकृतिसाध्या न वा?

२. किमर्थं मीमांसाया: अपरं नाम वाक्यशास्त्रमिति?

३. द्वादशलक्षणी इति किमर्थं मीमांसाया: नाम?

४. मीमांसाया: अन्यत् नाम तन्त्रम् इति, किमर्थम्?

५. मीमांसाया: नामान्तराणि कानि?

२. साधूत्तरं योजयत

१. मीमांसा	अ) पूजा
२. सन्	आ) पूजितविचार:
३. मान्	इ) विचार:
४.लक्षणम्	ई) जिज्ञासा
५. जिज्ञासा	उ) अध्याय:

३. एकं पृथक् कुरुत

१. एषु एतत् नान्तर्भवति

१) द्वादशलक्षणी ३) मीमांसा

२) द्वादशाध्यायी ४) वेदान्त:

२. असम्बद्धं पृथक् कुरुत

१) कर्ममीमांसा ३) अध्वरमीमांसा

२) धर्ममीमांसा ४) उत्तरमीमांसा

३. एकं निवारयत

१) कर्ममीमांसा ३) ज्ञानमीमांसा

२) धर्ममीमांसा ४) धर्मजिज्ञासा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. रिक्तस्थानं पूरयत

१. वेदार्थस्य प्रतिपादनात् मीमांसायाः ...... इति नाम।

२. वेदस्य पूर्वभागस्य विचारणात् .... इति नाम।

३. मीमांसा इति पदं .... धातोः निष्पन्नम्।

४. जिज्ञासा इति पदस्य लक्ष्यार्थः ....।

५. ....मीमांसायाः पूजितत्वं सम्भवति।

५. पञ्चाङ्कप्रश्नाः

१. मीमांसापदनिष्पत्तिं व्याख्यात?

२. मीमांसायाः नामान्तराणि कानि?

३.यागरूपधर्मविचारणात् कानि नामानि मीमांसायाः प्रसिद्धानि?

६. दशाङ्कप्रश्नः

१. मीमांसायाः नामान्तरसद्भावे किं कारणम्?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तृतीयपाठाध्ययनस्य प्रयोजनानि

१. वयम् एनं पाठं पठित्वा मीमांसायाः आवश्यकतां जानीमः। २. मीमांसा कथं प्राचीना इति अवगच्छामः। ३. मीमांसाशास्त्रस्य प्राचीनाम् ऋषिपरम्परां जानीमः।

पाठे अन्तर्गताः प्रधानविषयाः





ब्रह्मणा उपदिष्टं शास्त्रं मीमांसा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. तृतीयः पाठः - १. मीमांसायाः आवश्यकता

वैदिकेषु कर्मसु पुरुषाणां प्रवृत्तिसिद्ध्यर्थं वेदवाक्यानां व्याख्यानस्य आवश्यकता अभूत्। प्रवर्तकं निवर्तकं वा वेदवाक्यम् अतीव विस्तृतम्। अतः एव व्याख्यानरचनायाः अपेक्षा समागता। व्याख्यया विना कदाचित् भ्रान्तिरपि भवितुम् अर्हति। अतः वेदव्याख्यायाः प्रतिपादकं मीमांसादर्शनम् अवातरत्। तत्र वेदस्य पूर्वभागरूपस्य कर्मकाण्डस्य अर्थविचारार्थं पूर्वमीमांसा प्रवृत्ता [१]। उत्तरभागस्य ज्ञानकाण्डस्य अर्थविचारार्थम् उत्तरमीमांसा प्रवृत्ता।



२. मीमांसायाः प्राचीनता

मीमांसायाः प्राचीनतायाः विषये, प्रवचनपरम्परायाः विषये च न्यायरत्नाकरे इत्थं समुपलभ्यते, 'ब्रह्मा प्रजापतये मीमांसां प्रोवाच, सोऽपीन्द्राय, सोप्यादित्याय, स च वसिष्ठाय सोऽपि पराशराय, पराशरः कृष्णद्वैपायनाय सोऽपि जैमिनये' इति।

मीमांसा कर्मकाण्डस्य विचारार्थमेव प्रवृत्ता

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



३. मीमांसायाः परम्परा

दर्शनान्तरवत् मीमांसायाः अपि सूत्रकारः, भाष्यकारः, वार्तिककारश्च वर्तन्ते। मीमांसायाः सूत्रकारः भगवान् जैमिनिः। मीमांसायाः भाष्यकारः भगवान् शबरस्वामी। वार्तिककारः कुमारिलभट्टः। उपवर्षनामकः कश्चित् वृत्तिकारः अपि मीमांसायां प्रसिद्धः वर्तते।



भाट्टगुरुमिश्रमतानि इति मीमांसायां मतत्रयं विद्यते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तृतीयपाठस्य सार:

वेदवाक्यानाम् अर्थविवरणावसरे बहुधा विरोध: भवति। अत: परस्परविरोधपरिहारार्थम्, अर्थनिर्णयार्थं च मीमांसाया: आवश्यकता अस्ति।

मीमांसा ब्रह्मण: आरभ्य जैमिनिपर्यन्तं प्रवचनपरम्परया समागता। भगवता जैमिनिना मीमांसाया: सूत्राणि रचितानि। शबरस्वामिभि: भाष्यं रचितम्। कुमारिलभट्ट: वार्तिकं रचयामास।

अभ्यासा:

तृतीय: पाठ:

१. एकाङ्कप्रश्ना:

अ. एकेन पदेन उत्तरत

१. मीमांसाया: भाष्यकार: क: ?

२. मीमांसाया: वार्तिककार: क: ?

३. मीमांसाया: वृत्तिकार: क: ?

४. मीमांसाया: सूत्रकार: क: ?

५. पूर्वमीमांसा कस्य वेदभागस्य अर्थविचारार्थं प्रवृत्ता ?

६. कस्मात् मीमांसा समारब्धा ?

आ. एकेन वाक्येन समाधत्त

१. मीमांसाया: प्राचीनताप्रतिपादकं वाक्यं किम् ?

२. वेदवाक्यानां विचारस्य अकरणे किं भवति ?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. साधूत्तरं योजयत

१. कर्मकाण्डम्	अ) वेदान्तः
२. उपवर्षः	आ) मीमांसा
३. ज्ञानकाण्डम्	इ) वृत्तिकारः
४. जैमिनिः	ई) भाष्यकारः
५. शबरः	उ) सूत्रकारः

३. एकं पृथक् कुरुत

१. एषु एतत् नान्तर्भवति

१) व्यासः २) शबरः ३) जैमिनिः ४) कुमारिलः

२. असम्बद्धं पृथक् कुरुत

१) ब्रह्मा २) प्रजापतिः ३) इन्द्रः ४) अग्निः

३. एकं निवारयत

१) जैमिनिः २) वसिष्ठः ३) पराशरः ४) व्यासः

४. असम्बद्धं चिनुत

१) ब्रह्मा २) इन्द्रः ३) प्रजापतिः ४) विष्णुः

४. रिक्तस्थानं पूरयत

१. मीमांसायाः वृत्तिकारः.................।

२. ब्रह्मा प्रजापतये मीमांसां प्रोवाच,.........।

३. मीमांसायाः भाष्यकारः...............।

४. मीमांसायाः सूत्रकारः..................।

५. मीमांसायाः वार्तिककारः.............।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

५. पञ्चाङ्कप्रश्नाः

१. मीमांसायाः प्रवचनपरम्परां व्याख्यात ?

२. मीमांसाशास्त्रस्य का वा आवश्यकता ?

३. मीमांसायाः सूत्रकारादीन् विशदयत ?

६. दशाङ्कप्रश्नः

१. मीमांसायाः प्राचीनताम्, ऋषिपरम्परां च व्याख्यात ?

परियोजना

वेदान्तादिशास्त्रेषु विद्यमानानां सूत्रवार्तिकभाष्यकाराणां नामानि विचारयत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चतुर्थपाठाध्ययनस्य प्रयोजनानि

१. वयम् एनं पाठं पठित्वा सूत्रस्य भाष्यस्य वार्तिकस्य च लक्षणम्, स्वरूपं च जानीमः। २. मीमांसायाः प्रस्थानत्रयम् अवगच्छामः।

पाठे अन्तर्गताः प्रधानविषयाः





मीमांसायां जैमिनिप्रणीतं सूत्रमेव मूलम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. चतुर्थः पाठः - १. सूत्रादीनां लक्षणम्

'अल्पाक्षरम् असन्दिग्धं सारवत् विश्वतोमुखम्।
अस्तोभम् अनवद्यञ्च सूत्रं सूत्रविदो विदुः।।'

सूत्रेण विस्तृतविषयाः प्रतिपाद्याः भवन्ति। तथापि अत्यल्पपदैः एव विषयः प्रतिपादनीयः। सूत्रं संशयजनकं न भवेत्। सूत्रं प्रतिपाद्यस्य विषयस्य सारम् एव वदेत्। सूत्रेण स्वल्पैः एव पदजालैः सर्वे वक्तव्याः विषयाः द्योतनीयाः। सूत्रे 'हुं फट्' इत्यादीनि स्तोभाक्षराणि न स्युः। सूत्रं बाधितार्थं न प्रतिपादयेत्।

२. भाष्यलक्षणम्

'सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः।।'

सूत्रे विद्यमानानां सर्वेषां पदानाम् अर्थनिरूपणपुरस्सरं सूत्रार्थः वक्तव्यः। भाष्यं सूत्रार्थस्य वर्णनावसरे प्रयुक्तानां पदानाम् अपि अर्थवर्णनं कुर्वीत।

३. वार्तिकलक्षणम्

'उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।
तं ग्रन्थं वार्तिकं प्राहुः वार्तिकज्ञाः मनीषिणः।।'

वार्तिकेन भाष्ये उक्तविषये विवरणं देयम्। भाष्ये अनुक्तविषयेऽपि विवरणं प्रदेयम्। भाष्येण दुष्टार्थः कथितः चेत् तस्यापि निवारणं कर्तव्यम्। एवं वार्तिकं सर्वेषु विषयेषु सुविस्तृतं विचारं कुर्यात्।

मीमांसायाः वृत्तिकाराः उपवर्षबोधायनादयः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. मीमांसायाः प्रस्थानत्रयम्

मीमांसायां प्रस्थानत्रयं प्रसिद्धम्। कुमारिलभट्टपादानां वार्तिकम् अवलम्ब्य भाट्टमतं प्रवृत्तम्। तथैव प्रभाकरगुरूणां टीकाम् अवलम्ब्य गुरुमतञ्च प्रवृद्धम्। मीमांसायाः तृतीयसम्प्रदायस्य प्रवर्तकत्वेन मुरारिमिश्रस्य नाम अपि प्रथितम् अस्ति। अत्र 'मुरारेः तृतीयः पन्थाः' इति वचनं प्रमाणम्। मतत्रयस्यापि शबरस्वामिना विरचितं जैमिनीयमीमांसासूत्रभाष्यमेव मूलम्।



भगवान् जैमिनिमहर्षिः द्वादशाध्यायोपेतं मीमांसाशास्त्रं रचयामास। अयं जैमिनिः दार्शनिकानां मतानुसारेण मीमांसादर्शनस्य प्रवर्तकः न भवति। यतः जैमिनेः प्रागपि मीमांसायाः प्रचुरः प्रसारः आसीत्। जैमिनेः पूर्वमपि कार्ष्णाजिनिः, आत्रेयः इत्यादयः मीमांसकमूर्धन्याः प्रथितयशस्काः आसन्। परम् एभिः प्रणीतानि सूत्राणि न समुपलभ्यन्ते।

आचार्यः उपवर्षः जैमिनिसूत्रस्य वृत्तीः लिलेख। मीमांसादर्शने उपवर्षः एव प्राचीनः वृत्तिकारः इति इतिहासकाराणां मतम्। आचार्यः शबरस्वामी

मीमांसा द्वादशाध्यायात्मिका वर्तते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सूत्राणां सुविस्तृतं भाष्यं प्रणिनाय। इदं च भाष्यं प्रसन्नगम्भीरं विद्यते। आचार्यः कुमारिलभट्टः श्लोकवार्तिकम्, तन्त्रवार्तिकम्, टुप्टीका इत्येतान् त्रीन् ग्रन्थान् ग्रथयामास। अस्मिन् दर्शने बहवः टीकाकाराः वर्तन्ते। तथापि कुमारिलप्रभाकरौ सुप्रसिद्धौ वर्तेते। गुरुणा प्रभाकरेण बृहती, लघ्वी इति ग्रन्थौ प्रणीतौ। मुरारिणा रचितः त्रिपादीनीतिनयनम् इति ग्रन्थः साम्प्रतं नोपलभ्यते।



चतुर्थपाठस्य सारः

सूत्रं स्वल्पैः अक्षरैः संशयरहितस्य, सारभूतस्य, विस्तृतार्थस्य, अनिन्दनीयस्य च विषयस्य प्रतिपादकम्, स्तोभाक्षररहितं च भवति।

भाष्यं सूत्रगतपदानुसारेण सूत्रार्थं वर्णयति। एवम् अर्थवर्णनावसरे प्रयुक्तस्य स्वपदस्य च वर्णनं करोति।

मीमांसा वेदार्थनिर्णयार्थमेव प्रवृत्तं दर्शनम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वार्तिकं भाष्ये उक्तस्य विषयस्य, अनुक्तस्य विषयस्य, दोषयुक्तस्य विषयस्य च वर्णनं करोति।

मीमांसायां भाट्टमतम्, गुरुमतम्, मिश्रमतम् इति मतत्रयं भवति। मतत्रयस्यापि प्रवर्तकाः क्रमशः कुमारिलभट्टः, प्रभाकरमिश्रः, एवं मुरारिमिश्रः इति भवन्ति। मतत्रयस्यापि मूलभूतग्रन्थः एभिः रचितं वार्तिकम्, टीकाश्च ।

अभ्यासाः
चतुर्थः पाठः

१. एकाङ्कप्रश्नाः

अ. एकेन पदेन उत्तरत

१. सूत्राणां विवरणं केन क्रियते?

२. भाष्यस्य विवरणं केन क्रियते?

३. भाट्टमतस्य प्रवर्तकः कः?

४. गुरुमतस्य प्रवर्तकः कः?

५. मिश्रमतस्य प्रवर्तकः कः?

६. मुरारिः कं ग्रन्थं रचितवान्?

७. उपवर्षस्य ग्रन्थः कः?

८. वृत्तिकारः कः?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आ. एकेन वाक्येन समाधत्त

१. मीमांसायाः प्रस्थानत्रयं किम्?

२. कुमारिलस्य ग्रन्थाः के?

३. प्रभाकरेण के ग्रन्थाः प्रणीताः?

४. सूत्रस्य लक्षणं किम्?

५. वार्तिकस्य किं लक्षणम्?

६. भाष्यस्य लक्षणं किम्?

३. साधूत्तरं योजयत

१.टुप्टीका	अ) सूत्रकारः
२.जैमिनिः	आ) भाष्यकारः
३.कुमारिलः	इ) वृत्तिकारः
४.शबरः	ई) वार्तिककारः
५. उपवर्षः	उ) कुमारिलः
६. लघ्वी	ऊ) गुरुः

४. एकं पृथक् कुरुत

१. एषु एतत् नान्तर्भवति

१) तन्त्रवार्तिकम् ३) श्लोकवार्तिकम्

२) मन्त्रवार्तिकम् ४) टुप्टीका

२. असम्बद्धं पृथक् कुरुत

१) कुमारिलः ३) मुरारिः

२) प्रभाकरः ४) उपवर्षः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

५. रिक्तस्थानं पूरयत

१. मुरारेः ....पन्थाः।

२. अल्पाक्षरमसन्दिग्धं..........विदुः।

३. सूत्रार्थो वर्ण्यते.............विदुः।

४. उक्तानुक्त............मनीषिणः।

६. पञ्चाङ्कप्रश्नाः

१. कुमारिलमतं व्याख्यात ?

२. गुरुमतं विशदयत ?

३. मीमांसायाः प्रस्थानत्रयस्य प्रवर्तकाः के ?

४. सूत्रेण कथं भाव्यम् ?

५. भाष्येण किं कार्यम् ?

६. वार्तिकेन किं कर्तव्यम् ?

७. दशाङ्कप्रश्नाः

१. सूत्रवार्तिकभाष्याणां लक्षणं विलिख्य, व्याख्यात ?

२. मीमांसायाः प्रस्थानत्रयम्, तद्ग्रन्थान् च स्पष्टयत ?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पञ्चमपाठाध्ययनस्य प्रयोजनानि

१. वयम् एनं पाठं पठित्वा मीमांसायां प्रतिपाद्यं विषयं जानीमः। २. मीमांसाशास्त्रस्य विस्तारम् अवगच्छामः। ३. मीमांसाशास्त्रस्य अनुबन्धं जानीमः। ४. मीमांसायाः किं प्रयोजनम् इति अवगच्छामः।



५. पञ्चमः पाठः - १. मीमांसायाः प्रतिपाद्यः विषयः

अस्मिन् मीमांसाशास्त्रे द्वादशसु अध्यायेषु प्रत्येकं द्वादशविषयाः विचारिताः। क्रमेण प्रथमादिषु अध्यायेषु प्रमाणविचारः, भावनाभेदविचारः, शेषत्वविचारः, प्रयुक्तिविचारः, क्रमविचारः, अधिकारविचारः, सामान्यातिदेशविचारः, विशेषातिदेशविचारः, ऊहविचारः, बाधविचारः, तन्त्रविचारः, प्रसङ्गविचारश्च कृतः[१०]।

मीमांसायां द्वितीयाध्यायादारभ्य धर्मरूपः प्रमेयः विचार्यते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. मीमांसायाः विस्तारः

मीमांसायां द्वादशसु अध्यायेषु षष्टिः पादाः वर्तन्ते। यतः तृतीये, षष्ठे, दशमे च अष्टौ पादाः विद्यन्ते। तदितरेषु अध्यायेषु प्रत्येकं चत्वारः पादाः वर्तन्ते। मीमांसायां प्रथमाध्यायादारभ्य क्रमशः ३४, ४७, १५०, ५५, ५४, १०१, २१, २४, ६५, १६८, ५९, एवं ६६ अधिकरणानि सन्ति। आहत्य ८४४ अधिकरणानि सन्ति।

क्र.सं.	अध्यायः	अध्यायविषयः	पादसंख्या	अधिकरणसंख्या
१	प्रथमाध्यायः	प्रमाणविचारः	४	३४
२	द्वितीयाध्यायः	भावनाभेदविचारः	४	४७
३	तृतीयाध्यायः	शेषत्वविचारः	८	१५०
४	चतुर्थाध्यायः	प्रयुक्तिविचारः	४	५५
५	पञ्चमाध्यायः	क्रमविचारः	४	५४
६	षष्ठाध्यायः	अधिकारविचारः	८	१०१
७	सप्तमाध्यायः	सामान्यातिदेशविचारः	४	२१
८	अष्टमाध्यायः	विशेषातिदेशविचारः	४	२४
९	नवमाध्यायः	ऊहविचारः	४	६५
१०	दशमाध्यायः	बाधविचारः	८	१६८
११	एकादशाध्यायः	तन्त्रविचारः	४	५९
१२	द्वादशाध्यायः	प्रसङ्गविचारः	४	६६

३. अनुबन्धनिरूपणम्

'१.अधिकारी च २.सम्बन्धो ३.विषयश्च ४.प्रयोजनम्।
ग्रन्थादावेव वक्तव्यम् अनुबन्धचतुष्टयम्।।'

सर्वेष्वपि शास्त्रेषु अनुबन्धचतुष्टयं भवति। विषयः, प्रयोजनम्, अधिकारी, सम्बन्धश्च इति। शास्त्रे प्रतिपाद्यः, विषयः भवति।

अधिकरणं विषयादिपञ्चावयवकं भवति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शास्त्राध्ययनस्य फलं प्रयोजनम्। अधिकारः अस्य अस्तीति अधिकारी। शास्त्राध्ययने योग्यता एव अधिकारः। मीमांसाशास्त्राध्ययने अधिकारी तु यः वेदम्, व्याकरणादिशास्त्रं च अधीतवान्, मीमांसाशास्त्रं च न अधीतवान् सः भवति। विषयः वेदवाक्यानाम् अर्थनिर्णयफलकः विचारः। शास्त्रस्य शास्त्रप्रतिपाद्यविषयस्य च सम्बन्धः भवति। सः सम्बन्धः बोध्यबोधकभावरूपः। धर्माधर्मज्ञानं मीमांसाशास्त्राध्ययनस्य प्रयोजनम्।

मीमांसाशास्त्रस्य अनुबन्धचतुष्टयम्



४. मीमांसायाः प्रयोजनम्

मीमांसायाः प्रयोजनन्तु धर्मज्ञानमेव। इदं मीमांसादर्शनं धर्माधर्मयोः विचारार्थमेव प्रवृत्तम्। मीमांसया धर्मविचारः अनुष्ठानाय, अधर्मविचारः अननुष्ठानार्थं च कृतः। उक्तं च अभियुक्तैः -

'धर्मे प्रमीयमाणे हि वेदेन करणात्मना।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति।।'

'अथातो धर्मजिज्ञासा सूत्रम् आद्यम् इदं कृतम्।
धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्।।'

सङ्गतेः प्रकारचतुष्टयं विद्यते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पञ्चमपाठस्य सारः

मीमांसायाम् उपद्विसहस्रसूत्राणि, द्वादशाध्यायाः, षष्टिः पादाः च सन्ति। द्वादशसु अध्यायेषु क्रमशः प्रमाणम्, भावनाभेदः, शेषत्वम्, प्रयुक्तिः, क्रमः, अधिकारः, सामान्यातिदेशः, विशेषातिदेशः, ऊहः, बाधः, तन्त्रम्, प्रसङ्गः च विचारितः।

मीमांसायां वेदवाक्यानि विषयः। धर्मज्ञानं प्रयोजनम्। मीमांसायाः अध्ययने साङ्गवेदाध्यायी अधिकारी भवति। प्रतिपाद्यप्रतिपादकभावः सम्बन्धः।

अभ्यासाः
पञ्चमः पाठः

१. एकाङ्कप्रश्नाः

अ. एकेन पदेन उत्तरत

१. मीमांसायां प्रथमाध्यायस्य विषयः कः?
२. मीमांसायां द्वितीयाध्यायस्य विषयः कः?
३. प्रयुक्तिः नाम किम्?
४. मीमांसायां कति पादाः सन्ति?
५. मीमांसायां कति अधिकरणानि सन्ति?
६. मीमांसाध्ययनस्य प्रयोजनं किम्?
७. मीमांसायां सम्बन्धः कः?
८. मीमांसायां प्रतिपाद्यः विषयः कः?
९. मीमांसायां द्वादशाध्यायस्य विषयः कः?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आ. एकेन वाक्येन समाधत्त

१. अनुबन्धचतुष्टयं किम्?

२. मीमांसाध्ययने कः अधिकारी?

३. मीमांसाप्रतिपाद्यविषयः कः?

४. धर्माधर्मयोः विचारः मीमांसया किमर्थं कृतः?

३. साधूत्तरं योजयत

१. धर्मज्ञानम्	अ) सम्बन्धः
२. प्रमाणानि	आ) पञ्चमाध्यायविषयः
३. क्रमः	इ) द्वादशाध्यायविषयः
४. प्रसङ्गः	इ) प्रथमाध्यायविषयः
५. बोध्यबोधकभावः	उ) प्रयोजनम्

४. एकं पृथक् कुरुत

१. एषु एतत् नान्तर्भवति

१) विषयः ३) अधिकारी
२) प्रमाणम् ४) सम्बन्धः

२. असम्बद्धं पृथक् कुरुत

१) शेषत्वम् ३) तन्त्रम्
२) अतिदेशः ४) धर्मः

३. एकं निवारयत

१) ऊहः ३) तन्त्रम्
२) बाधः ४) क्रमः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

५. रिक्तस्थानं पूरयत

१. धर्मे प्रमीयमाणे तु .... पूरयिष्यति।

२. अधिकारी च सम्बन्धो.............चतुष्टयम्।

३. अथातो धर्मजिज्ञासा ....प्रयोजनम्।

४. .... शास्त्राध्ययनस्य प्रयोजनम्।

५. मीमांसाध्ययने सम्बन्धः....................।

६. शेषत्वम्, प्रयुक्तिः, क्रमः, ... अतिदेशः।

६. पञ्चाङ्कप्रश्नाः

१. मीमांसायां प्रतिपाद्यः विषयःकः?

२. मीमांसायां प्रत्येकं कति पादाः सन्ति?

३. अनुबन्धं विशदयत?

४. मीमांसायाः प्रयोजनं स्पष्टयत?

७. दशाङ्कप्रश्नः

१. अध्यायार्थान्, अध्यायगतपादान्, अधिकरणसंख्याः च स्पष्टयत?

परियोजना

वेदान्तादिशास्त्रेषु प्रतिपाद्यविषयं चिन्तयत ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

षष्ठपाठाध्ययनस्य प्रयोजनानि

१. वयम् एनं पाठं पठित्वा अधिकरणस्य स्वरूपं जानीमः। अधिकरणस्य अवयवानां विवरणं जानीमः। विशिष्य सङ्गतेः स्वरूपम्, विभागं च अवगच्छामः।

पाठे अन्तर्गताः प्रधानविषयाः





अधिकरणेन अधिकरणान्तरस्य सङ्गतिः वक्तव्या

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

६. षष्ठः पाठः - १. अधिकरणस्य स्वरूपम्

प्रत्येकम् अपि अधिकरणस्य पञ्च अवयवाः भवन्ति। यथा -

'१.विषयो २.विशयश्चैव ३.पूर्वपक्षः ४.तथोत्तरम्।
५.सङ्गतिश्चेति पञ्चैतान् शास्त्रे अधिकरणं विदुः।।'

१. विषयः, २. संशयः, ३. पूर्वपक्षः, ४. सिद्धान्तः, ५.सङ्गतिः इति अधिकरणस्य पञ्च अवयवाः भवन्ति। ६. प्रयोजनम् अपि मेलयित्वा केचन अधिकरणस्य षट् अङ्गानि वर्णयन्ति।

विषयः यः संशयस्य विषयः भवति सः विषयः। यथा 'शब्दः नित्यः उत अनित्यः' इत्यत्र संशयः शब्दविषयकः। अतः शब्दः विषयः।

विशयः नाम संशयः। एकस्मिन् धर्मिणि विशेषणतया विरुद्धनानाधर्मज्ञानं यत् भवति सः संशयः। यथा 'शब्दः नित्यः, अनित्यः वा' इति। शब्दविशेष्यकज्ञाने नित्यत्वानित्यत्वरूपयोः परस्परविरुद्धधर्मयोः विशेषणतया भानात् लक्षणसमन्वयः। एकत्र विरुद्धानेककोटिकं ज्ञानम् इति वा संशयस्य लक्षणम्।

सङ्गतिः नाम सम्बन्धः। पूर्वाधिकरणे निरूपितेन विषयेण साकं प्रकृताधिकरणे निरूपणीयस्य विषयस्य सम्बन्धः। यथा शब्दनित्यत्वाधिकरणात् पूर्वतनम् अधिकरणं चोदनाप्रामाण्याधिकरणम्। तत्र धर्मे विधिः प्रमाणम् इति निरूपितम्। प्रकृते शब्दनित्यत्वाधिकरणे पूर्वपक्षे शब्दस्य अनित्यत्वात् विधिः धर्मे अप्रमाणम् इति कथनात् आक्षेपिकी सङ्गतिः।

पूर्वपक्षः पूर्वं विद्यमानः पक्षः। निरसनीयकोटिमात्रं वा युक्तिज्ञानं वा। यथा शब्दः अनित्यः इति।

सिद्धान्तः पूर्वपक्षकोटिनिरासपूर्वकः स्वीकरणीयकोटेः निर्देशः।

मीमांसायाः सूत्रकारः भगवान् जैमिनिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

साधनीया कोटि: सिद्धान्त: इति। अन्ते सिद्ध: सिद्धान्त: इति वा। यथा शब्दनित्यत्वाधिकरणे शब्द: नित्य: इति।

प्रयोजनम् फलम्, प्रवृत्युद्देश्यम्। अधिकरणसिद्ध: न्याय: वा। यथा - शब्दनित्यत्वाधिकरणे शब्दस्य नित्यत्वं साधितम्। शब्द: नित्यश्चेत्, शब्दराशे: वेदस्य नित्यत्वं सम्भवति। तेन वेदैकदेशस्य विधे: अपि नित्यत्वात् धर्मे प्रामाण्यं सिद्धं भवति।



२. सङ्गति:

शास्त्रे क्रमेण परस्परसम्बद्धा: विषया: एव निरूप्यन्ते। एतादृशसम्बन्ध: एव सङ्गति:। तस्या: सङ्गते: लक्षणं दर्शनेषु दार्शनिका: 'निरूपणीयविषयनिष्ठ: सम्बन्ध:' इति प्रतिपादयामासु:।

'शास्त्राध्याये तथा पादे न्यायसङ्गतय: त्रिधा' इति उक्तरीत्या मीमांसायां प्राधान्येन तिस्र: सङ्गतय: भवन्ति। यथा - १.शास्त्रसङ्गति:, २. अध्याय-

मीमांसाया: भाष्यकार: भगवान् शबरस्वामी

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सङ्गतिः, ३.पादसङ्गतिः इति। अधिकरणस्यापि एतदतिरिक्ता सङ्गतिः भवति।

१. शास्त्रसङ्गतिः - शास्त्रेण प्रतिपाद्यः विषयः अधिकरणेन प्रतिपादनीयः भवेत्। तदैव विषयः तस्मिन् शास्त्रे सङ्गतः भवति। इतरथा असम्बद्धप्रलापः एव स्यात्। यथा - धर्माधर्मनिरूपणं शास्त्रविषयः। तदुपयुक्तविषयप्रतिपादनात् अधिकरणानां शास्त्रसङ्गतिः।

२. अध्यायसङ्गतिः - यस्य विषयस्य प्रतिपादनार्थम् अध्यायः भवति, तदध्यायसम्बद्धः एव विषयः अधिकरणेन प्रतिपादनीयः। तदा एव अध्यायेन सः विषयः सङ्गतः भवति। यथा - प्रथमाध्याये धर्मप्रमाणानां प्रामाण्य-निरूपणम्।

३. पादसङ्गतिः - पादप्रतिपाद्येन विषयेण साकम् अधिकरणविषयस्य सम्बन्धः भवेत्। यथा - चतुर्थपादे पदप्रामाण्यस्य निरूपणम्।

४. एवं पूर्वाधिकरणेन साकम् उत्तराधिकरणस्यापि सङ्गतिः भवति। यथा अवसरसङ्गतिः, प्रसङ्गसङ्गतिः, आपवादिकी सङ्गतिः, आक्षेपिकी सङ्गतिः, प्रत्युदाहरणसङ्गतिः, दृष्टान्तसङ्गतिः, उपोद्घातसङ्गतिः, उपजीव्योपजीवकभावसङ्गतिः इत्याद्याः।



धर्मज्ञानमेव मीमांसायाः प्रयोजनम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

षष्ठपाठस्य सारः

विषयः, सङ्गतिः, संशयः, पूर्वपक्षः, सिद्धान्तः इति अधिकरणस्य पञ्च अवयवाः भवन्ति। केचन प्रयोजनम् अपि मेलयित्वा अधिकरणस्य षट् अवयवाः वर्तन्ते इति वदन्ति। अधिकरणेन प्रतिपाद्यं वस्तु विषयः। पूर्वविषयेण साकं सम्बन्धः सङ्गतिः। एकत्र विरुद्धनानाकोटिकं ज्ञानं संशयः। निरसनीया कोटिः पूर्वपक्षः। साधनीया कोटिः सिद्धान्तः।

सङ्गतिः प्राधान्येन शास्त्राध्यायपादभेदेन त्रिधा विभक्ता। प्रसङ्गाद्य-वान्तराधिकरणसङ्गतयः अपि वर्तन्ते।

अभ्यासाः
षष्ठः पाठः

१. एकाङ्कप्रश्नाः

अ. एकेन पदेन उत्तरत

१. अधिकरणस्य कति अवयवाः भवन्ति?
२. विषयः नाम कः?
३. सङ्गतिः नाम का?
४. प्राधान्येन कति सङ्गतयः भवन्ति?
५. विशयः नाम कः?

आ. एकेन वाक्येन समाधत्त

१. सिद्धान्तस्य किं लक्षणम्?
२. अधिकरणस्य काः सङ्गतयः?
३. अधिकरणस्वरूपं निरूपयत?
४. अधिकरणस्य अवयवाः कति, ते के?
५. मीमांसायां शास्त्रसङ्गतिः का?

मीमांसायाः मूलं जैमिनिप्रणीतं सूत्रम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. साधूत्तरं योजयत

१. सङ्गतिः	अ) संशयः
२. विशयः	आ) पञ्चावयवोपेतम्
३. अधिकरणम्	इ) अधिकरणाङ्गम्
४. संशयः	ई) तिस्रः
५. सङ्गतयः	उ) शब्दः नित्यः उत अनित्यः

४. एकं पृथक् कुरुत

१. एषु एतत् नान्तर्भवति

१) आक्षेपिकी ३) प्रामाणिकी

२) आपवादिकी ४) प्रासङ्गिकी

२. असम्बद्धं पृथक् कुरुत

१) विषयः ३) पूर्वपक्षः

२) उत्तरपक्षः ४) विपक्षः

३. एकं निवारयत

१) शास्त्रसङ्गतिः ३) प्रसङ्गसङ्गतिः

२) अध्यायसङ्गतिः ४) पादसङ्गतिः

५. रिक्तस्थानं पूरयत

१. विषयो विशयश्चैव..................।

२. शास्त्राध्याये तथा पादे ....।

३. निरसनीया कोटिः..................।

४. साधनीया कोटिः ....।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

५. एकस्मिन् धर्मिणि विशेषणतया......।

६. निरूपणीयविषयनिष्ठः सम्बन्धः......।

६. पञ्चाङ्कप्रश्नाः

१. अधिकरणस्य अवयवाः के, प्रत्येकम् उदाहरत ?

२. सङ्गतिः प्रधानतया कतिधा विभक्ता, ताः काः ?

३. अधिकरणसङ्गतयः काः ?

४. प्रयोजनं व्याख्यात ?

७. दशाङ्कप्रश्नः

१. अधिकरणं विशदयत ?

२. सङ्गतिं प्रतिपादयत ?

परियोजना

अधिकरणान्तरेषु अधिकरणावयवान् विदाङ्कुरुत ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१. द्वितीयः परिच्छेदः

प्रथमपाठाध्ययनस्य प्रयोजनानि

१. वयम् एनं पाठं पठित्वा प्रथमसूत्रस्य विवरणं जानीमः। २. अध्ययनविधिम्, अध्ययनविधेः अर्थं च जानीमः। ३. कर्मणः स्वरूपम् अवगच्छामः, ४. कर्मणः विभागज्ञानं सम्पादयामः।

पाठे अन्तर्गताः प्रधानविषयाः

प्रथमं सूत्रम् — अथातो धर्मजिज्ञासा

अध्ययनविधिः — स्वाध्यायोऽध्येतव्यः



वेदाध्ययनस्य फलम् अर्थज्ञानम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वितीयः परिच्छेदः
१. प्रथमः पाठः - प्रथमाध्यायस्य विषयः

१. जिज्ञासासूत्रस्य विवरणम्

'अथातो धर्मजिज्ञासा' इति मीमांसायां प्रथमं सूत्रम्। अस्मिन् सूत्रे 'अथ', 'अतः', 'धर्मजिज्ञासा' इति पदत्रयं विद्यते। 'अथ' इति शब्दस्य अनन्तरम् इत्यर्थः। परं सूत्रे विद्यमानस्य 'अथ' इति शब्दस्य वेदाध्ययनस्य अनन्तरम् इत्यर्थः स्वीकार्यः। 'अतः' अर्थज्ञानार्थत्वात्। 'धर्मस्य'- वेदार्थस्य 'जिज्ञासा'- विचारः कर्तव्यः इति। वेदाध्ययनस्य अनन्तरम् अध्ययनस्य फलम् अर्थज्ञानं भवति इत्यतः, वेदार्थस्य विचारः कर्तव्यः इति समग्रसूत्रस्य अर्थः। विचारश्च मीमांसाधीनः। अतः धर्मविचाररूपम् इदं मीमांसाशास्त्रम् आरम्भणीयमिति 'अथातो धर्मजिज्ञासा' इति सूत्रस्य फलितार्थः।

अथातो धर्मजिज्ञासा	
अथ	वेदाध्ययनस्य अनन्तरम्
अतः	अर्थज्ञानरूपदृष्टफलकत्वात्
धर्मजिज्ञासा - धर्मस्य जिज्ञासा	वेदार्थस्य विचारः कर्तव्यः

२. अध्ययनविधिविचारः

'स्वाध्यायोऽध्येतव्यः' इति अध्ययनविधिः। स्वपदम् आत्मनः कुल-परम्परायाः बोधकम्। अध्यायपदं वेदशाखापरम्। स्वाध्यायः नाम स्वकुलपरम्परागता वेदशाखा इत्यर्थः। अध्ययनं च गुरुमुखोच्चारणपूर्वकं शिष्यस्य अनूच्चारणम्। सः अध्ययनविधिः वेदाध्ययनं कर्तव्यमिति विधत्ते।

मीमांसायाः आद्यं सूत्रम् "अथातो धर्मजिज्ञासा"

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

'अध्ययनसंस्कृतेन स्वाध्यायेन अनुष्ठानोपयोगि अर्थज्ञानरूपं दृष्टफलं भावयेत्' इति अध्ययनविधेः अर्थः फलति।

३. कर्म चतुर्विधम्

१. उत्पाद्यम् -'पटं करोति' इत्यत्र पटः उत्पाद्यरूपं कर्म।

२. प्राप्यम् - 'वनं गच्छति' इत्यत्र वनं प्राप्यरूपं कर्म।

३. विकार्यम् -'ओदनं पचति' इत्यत्र ओदनः विकार्यरूपं कर्म।

४. संस्कार्यम् - 'व्रीहीन् प्रोक्षति' इत्यत्र व्रीहिः संस्कार्यरूपं कर्म।

प्रकृते स्वाध्यायः संस्कार्यरूपं कर्म इति स्वीक्रियते।



प्रथमपाठस्य सारः

मीमांसायां प्रथमं सूत्रम् 'अथातो धर्मजिज्ञासा' इति। अस्य सूत्रस्य नाम जिज्ञासासूत्रम् इति। यतो हि वेदार्थस्य जिज्ञासा कर्तव्या इति इदं सूत्रं सूचयति। अत्र जिज्ञासापदेन विचारार्थः स्वीकार्यः। तथा च यस्मात् कारणात् वेदाध्ययनस्य फलं प्रयोजनविशिष्टम् अर्थज्ञानम्, अतः वेद-अध्ययनानन्तरं वेदार्थस्य विचारः कर्तव्यः इति सूत्रार्थः भवति।

'स्वाध्यायोऽध्येतव्यः' इति अध्ययनविधिः एकस्वशाखायाः विधायकः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

'स्वाध्यायोऽध्येतव्यः' इति अध्ययनविधिः। अयं विधिः स्वकुल-परम्परागतवेदशाखायाः अध्ययनं कार्यम् इति विधत्ते। विधिना प्रयोजनरहितं कार्यं विधातुं न शक्यते। अतः अयं विधिः कृतस्य वेदाध्ययनस्य फलं प्रयोजनविशिष्टम् अर्थज्ञानम् इति सूचयति। अध्ययनेन स्वाध्यायं भावयेत् इति अस्य विधेः अर्थः भवति। भाव्याकाङ्क्षायाम् अधीतेन स्वाध्यायेन अर्थज्ञानं भावयेत् इति अर्थः।

अभ्यासाः
प्रथमः पाठः

१. एकाङ्कप्रश्नाः

अ. एकेन पदेन उत्तरत

१. जिज्ञासासूत्रे कति पदानि सन्ति?

२. धर्मजिज्ञासापदार्थः कः?

३. कर्म कतिविधम्?

आ. एकेन वाक्येन समाधत्त

१. अथशब्दार्थः कः?

२. अतः इति शब्दस्य अर्थः कः?

३. मीमांसायाः प्रथमं सूत्रं किम्?

४. अध्ययनविधिः कः?

५. स्वाध्यायपदार्थः कः?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

६. कर्मण: प्रकारा: के?
७. संस्कार्यकर्मण: उदाहरणं किम्?
८. मीमांसायां जिज्ञासासूत्रं किम्?
९. जिज्ञासापदस्य शक्यार्थ: क:?
१०. जिज्ञासापदस्य लक्ष्यार्थ: क:?
११. अध्ययनविधे: अर्थ: क:?
१२. स्वाध्याय: कीदृशं कर्म भवति?
१३. उत्पाद्यकर्मण: उदाहरणं किम्?
१४. प्राप्यकर्मण: उदाहरणं किम्?
१५. विकार्यकर्मण: उदाहरणं किम्?

२. साधूत्तरं योजयत

१. संस्कार्यम्	अ) जिज्ञासा
२. उत्पाद्यम्	आ) वनं गच्छति
३. धर्मस्य	इ) व्रीहीन् प्रोक्षति
४. प्राप्यम्	ई) पटं करोति
५. अध्ययनविधि:	उ) स्वाध्यायोध्येतव्य:

३. एकं पृथक् कुरुत

१. एषु एतत् नान्तर्भवति

१) उत्पाद्यत्वम्	३) घटत्वम्
२) संस्कार्यत्वम्	४) विकार्यत्वम्

२. असम्बद्धं पृथक् कुरुत

१) धर्मजिज्ञासा	३) अथ
२) अत:	४) अध्येतव्य:

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. रिक्तस्थानं पूरयत

१. व्रीहीन् ....।

२. अथातो............।

३. स्वाध्यायः.........।

५. पञ्चाङ्कप्रश्नाः

१. कर्मत्वं कतिविधम्, उदाहरत?

२. अध्ययनविधेः कः अर्थः?

३. जिज्ञासासूत्रं व्याख्यात?

६. दशाङ्कप्रश्नः

१. अध्ययनस्य दृष्टार्थत्वं स्पष्टयत?

परियोजना

दर्शनान्तरस्य प्रथमसूत्रं जानीत ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वितीयपाठाध्ययनस्य प्रयोजनानि

१. वयम् एनं पाठं पठित्वा धर्मलक्षणम्, धर्मलक्षणलक्ष्यं चावगच्छामः, लक्षणगतदलानां सार्थक्यं जानीमः। २. स्वर्गस्य स्वरूपम् अवगच्छामः। ३. धर्मसूत्रधर्मलक्षणयोः विरोधपरिहारः कथं कर्तव्यः इति जानीमः।

'धर्मस्य लक्षणम्'

'वेदप्रतिपाद्यत्वे सति प्रयोजनवत्वे सति अर्थत्वं धर्मः'

धर्मलक्षणलक्ष्यः - यागादिः

धर्मलक्षणे प्रतिपादितं धर्मप्रमाणम् - वेदः

X

धर्मलक्षणप्रतिपादके सूत्रे प्रतिपादितं धर्मप्रमाणम् - विधिः



२. द्वितीयः पाठः - धर्मलक्षणविचारः

धर्मः नाम कः, धर्मस्य लक्षणं किम् इति प्रश्ने सति मीमांसकानाम् अयं सिद्धान्तः, यागादिः एव धर्मः। आदिना होमदानयोः, दध्यादिद्रव्यस्य, आरुण्यादिगुणस्य, पर्णतादिजातेः च ग्रहणम्।

यागः - देवतोद्देशेन द्रव्यत्यागप्रधानकः प्रक्षेपाङ्गकः, यजतिना विहितः वा।

होमः -देवतोद्देशेन द्रव्यत्यागाङ्गकः प्रक्षेपप्रधानकः। जुहोतिना विहितः वा।

दानम् - स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनम्। ददातिचोदनाचोदितम्।

मीमांसायां विचार्यः प्रधानः विषयः वेदार्थरूपः धर्मः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वेदेन प्रतिपादितः प्रयोजनविशिष्टः अर्थः धर्मः। वेदप्रतिपाद्यत्वे सति प्रयोजनवत्वे सति अर्थत्वम् इति धर्मस्य लक्षणम्। वेदप्रतिपाद्यत्वं नाम वेदेन विहितत्वम्। प्रयोजनवत्वं नाम फलसाधनत्वम्। अर्थत्वं नाम श्रेयस्त्वम्, सुखत्वं वा। यागादौ लक्ष्ये धर्मलक्षणस्य समन्वयः। यतः यागादयः 'यजेत स्वर्गकामः' इत्यादिभिः वेदवाक्यैः विधीयन्ते। अतः वेदेन बोध्यत्वार्थकं वेदप्रतिपाद्यत्वरूपं दलं यागादिधर्मे समन्वेति। स्वर्गादि-रूपफलसाधकाः इमे यागादयः। अतः प्रयोजनवत्वरूपं द्वितीयं दलं यागादिधर्मे अन्वेति। एवं यागादयः नरकादिरूपस्य अनर्थफलस्य साधकाः न भवन्ति। अतः अर्थत्वम् इति दलमपि यागादिधर्मे समन्वेति।

२. स्वर्गलक्षणम्

> 'यन्न दुःखेन सम्भिन्नं न च ग्रस्तम् अनन्तरम्।
> अभिलाषोपनीतं च तत्सुखं स्वः पदास्पदम्।'

स्वर्गः कः पदार्थः इति प्रश्ने, यच्च सुखं दुःखमिश्रितं न भवति, यस्य सुखस्य प्राप्त्यनन्तरं दुःखस्य स्पर्शः न भवति, इच्छानुसारेण यस्य सुखस्य प्राप्तिः भवति, तत्सुखमेव स्वर्गपदवाच्यं भवति।

३. सूत्रलक्षणयोः विरोधपरिहारः

इत्थं धर्मलक्षणे वेदेन प्रतिपाद्यः धर्मः भवति इत्युक्तम्। परं धर्मलक्षण-प्रतिपादके जैमिनीये द्वितीये सूत्रे चोदनागम्यः धर्मः इत्युक्तम्। विधिपरः चोदनाशब्दः। एवं चोदनासूत्रानुसारं विधिबोधितः धर्मः भवति।

धर्मप्रमाणभूतः वेदः - विधिः, मन्त्रः, नामधेयम्, निषेधः, अर्थवादः इति पञ्चधा विभक्तः। अर्थात् विधिरिति वेदस्य एकः विभागः। इत्थं सूत्रे विधिरूपवेदैकदेशगम्यः धर्मः इत्युक्तम्। लक्षणे तु वेदः इति विध्यादिभिः पञ्चभिः विभागैः बोध्यः धर्मः इत्युक्तम्। एवं सूत्रोक्तस्य धर्मलक्षणस्य

वेदप्रतिपाद्यप्रयोजनवदर्थः धर्मः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ग्रन्थोक्तेन धर्मलक्षणेन साकं विरोधः सम्भवति इति संशयः जायते। तस्य इदं समाधानम्, विध्यादिपञ्चवेदविभागैरपि धर्मः एव प्रतिपाद्यते। अतः समग्रस्यापि वेदस्य धर्मः एव तात्पर्यविषयः भवति। अतः सूत्रघटकस्य चोदनापदस्य वेदरूपार्थे लक्षणा स्वीक्रियते। इत्थं चोदनागम्यः अर्थात् वेदगम्यः धर्मः इति सूत्रेणापि प्रोक्तमिति ग्रन्थसूत्रयोः धर्मलक्षणविषये न विरोधः।

द्वितीयपाठस्य सारः

धर्मविचारार्थमेव प्रवृत्तं शास्त्रं मीमांसाशास्त्रम्। मीमांसाशास्त्राधारेण धर्मलक्षणं वेदेन बोधितः, फलेन सहितः, बलवदनिष्ट-अजनकः पदार्थः इति भवति। यागदानहोमादयः धर्मः भवति। यतः यागादयः वेदेन प्रतिपादितः, स्वर्गादिफलविशिष्टः, बलवदनिष्टाजनकश्च च भवति।

सर्वाभीष्टं फलं स्वर्गः। सः स्वर्गः सुखविशेषरूपः, देशविशेषरूपः वा दार्शनिकैः अङ्गीकृतः। तच्च सुखं दुःखमिश्रितं न भवति। स्वर्गरूप-सुखस्य प्राप्तेः अनन्तरं दुःखस्य स्पर्शः न भवति। इच्छानुसारेण सुखं भवति।

मीमांसायां द्वितीयं सूत्रं 'चोदनालक्षणोऽर्थो धर्मः' इति। तच्च सूत्रं धर्मलक्षणप्रतिपादनपरम्। चोदनाशब्दस्य विधिः इत्यर्थः। तथा च विधिना बोधितः धर्मः इति अर्थः फलति। धर्मलक्षणे तु वेदबोधितः धर्मः इति उक्तं चेदपि धर्मसूत्रधर्मलक्षणयोः विरोधः इति न मन्तव्यम्। यतः समग्रवेदेन धर्मः प्रतिपाद्यते इति चोदनाशब्दस्य अर्थः वेदः इति लक्षणया स्वीक्रियते।

वेदः न ईश्वरकर्तृकः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभ्यासाः

१. एकाङ्कप्रश्नाः

अ. एकेन पदेन उत्तरत

१. धर्मस्य किम् उदाहरणम्?

२. धर्मलक्षणधर्मप्रमाणप्रतिपादकसूत्रयोः विरोधः अस्ति न वा?

३. चोदनाशब्दार्थः कः?

४. चोदनाशब्दस्य लक्ष्यार्थः कः?

५. समग्रवेदेन किं प्रतिपाद्यते?

६. धर्मलक्षणलक्ष्यः कः?

७. धर्मलक्षणे प्रयोजनवच्छब्दः किमर्थं प्रयुक्तः?

आ. एकेन वाक्येन समाधत्त

१. धर्मस्य किं लक्षणम्?

२. होमस्य किं लक्षणम्?

३. दानस्य किं लक्षणम्?

४. यागादिः इत्यत्र आदिना कस्य ग्रहणम्?

५. यागस्य लक्षणं किम्?

६. स्वर्गस्य लक्षणं किम्?

७. वेदप्रतिपाद्यदलसार्थक्यं प्रतिपादयत?

८. धर्मलक्षणप्रतिपादकं सूत्रं किम्?

९. धर्मः केन विहितः?

२. साधूत्तरं योजयत

१. यागः	अ) धर्माधर्मौ
२. होमः	आ) यजतिना विहितः

धर्मे अष्टौ प्रमाणानि सन्ति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. दानम् इ) अधर्मः
४. यागः ई) ददातिना विहितम्
५. वेदगम्यौ उ) जुहोतिना विहितः
६. श्येनः ऊ) धर्मः

३. एकं पृथक् कुरुत

१. एषु एतत् नान्तर्भवति
१) यागः २) दानम् ३) होमः ४) श्येनः

२. असम्बद्धं पृथक् कुरुत
१) वेदप्रतिपाद्यत्वम् ३) अनर्थत्वम्
२) अर्थत्वम् ४) प्रयोजनवत्त्वम्

४. रिक्तस्थानं पूरयत

१. वेदेन प्रतिपादितः............।
२. यागादिः एव ....।
३. स्वस्वत्वनिवृत्तिपूर्वकं ....।
४. यन्न दुःखेन सम्भिन्नं..........।

५. पञ्चाङ्कप्रश्नाः

१. धर्मलक्षणं प्रतिपाद्य लक्ष्ये समन्वयत ?
२. धर्मलक्षणदलकृत्यं स्पष्टयत ?
३. धर्मः स्वर्गादिफलसाधकः इति प्रतिपादयत ?
४. स्वर्गलक्षणं प्रतिपाद्य, विवृणुत ?

६. दशाङ्कप्रश्नः

१. धर्मलक्षणधर्मसूत्रयोः विरोधं परिहरत ?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तृतीयपाठाध्ययनस्य प्रयोजनानि

१. वयम् एनं पाठं पठित्वा वेदस्य परिचयं प्राप्नुमः। २. वेदस्य विभागज्ञानं सम्पादयामः। ३. धर्मे कति प्रमाणानि सन्ति इति जानीमः।

वेदस्य विभागः



प्रमाणानि



धर्मे इतरनिरपेक्षं प्रमाणं वेदः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. तृतीयः पाठः - १. वेदः

वेदः नाम यत् वाक्यं पुरुषेण निर्मितं न भवति, तादृशं वाक्यम्। अपौरुषेयं वाक्यं वेदः इति शास्त्रीयं लक्षणम्। अपौरुषेयत्वे सति वाक्यत्वम् इति वेदस्य लक्षणम्, वेदः इति लक्ष्यनिर्देशः। ऋगादिवेदस्य वाक्यरूपत्वात्, तस्य च अपौरुषेयत्वात् लक्षणसमन्वयः। वेदलक्षणे वाक्यत्वमात्रोक्तौ कालिदासादिपौरुषेयवाक्ये अतिव्याप्तिः। अतः तन्निवारणाय अपौरुषेयत्वम् इति दलम्। अपौरुषेयत्वमात्रोक्तौ ब्रह्मस्वर्गादौ अतिव्याप्तिः। अतः तन्निवारणाय वाक्यत्वम् इति दलम्।

२. वेदविभागः

सः च अपौरुषेयवाक्यात्मकः वेदः - मन्त्रः, ब्राह्मणम् इति द्वेधा विभक्तोऽपि विधि-मन्त्र-नामधेय-निषेध-अर्थवाद-भेदात् पञ्चविधः।



मीमांसा नाम द्वादशलक्षणी। प्रकृते लक्षणशब्दः अध्यायपरः। मीमांसायां द्वादशाध्यायाः वर्तन्ते। प्रत्येकस्मिन्नपि अध्याये प्रत्येकं विषयः विचारितः। तेषां निरूपणम् अत्र क्रियते।

वेदे विधिः प्रधानः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मीमांसायां प्रथमाध्यायः प्रमाणनिरूपणपरः। तत्र च अष्टौ प्रमाणानि निरूपितानि। यथा १.विधिः, २.अर्थवादः, ३.मन्त्रः, ४.स्मृतिः, ५.आचारः, ६.नामधेयम्, ७.वाक्यशेषः, ८.सामर्थ्यम् इति। तेषां निरूपणमत्र क्रियते।

मीमासायाः प्रमेयः धर्मः। प्रमेयस्य निर्णयः प्रमाणेन भवति इति दार्शनिकसमयः। अतः आदौ धर्मप्रमाणानि निरूप्यन्ते।



वेदे पञ्चविधवाक्यानि सन्ति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तृतीयपाठस्य सारः

धर्मे प्रमाणं वेदः। तस्य लक्षणम् अपौरुषेयं वाक्यम् इति। प्रतिपाद्यविषयाधारेण वेदस्य पञ्च विभागाः भवन्ति। विधिमन्त्र-नामधेयनिषेधार्थवादाः इति।

धर्मे अष्टौ प्रमाणानि सन्ति। विध्यर्थवादमन्त्रस्मृत्याचार-नामधेयवाक्यशेषसामर्थ्यानि इति।

अभ्यासाः

१. एकाङ्कप्रश्नाः

अ. एकेन पदेन उत्तरत

१. धर्मे परमं प्रमाणं किम्?

२. प्रथमाध्यायस्य विषयः कः?

३. धर्मे कति प्रमाणानि सन्ति?

४. वेदस्य कति विभागाः वर्तन्ते?

५. मीमांसाप्रमेयः कः?

६. वेदस्य पौरुषेयत्वम् उत अपौरुषेयत्वम्?

आ. एकेन वाक्येन समाधत्त

१. वेदस्य लक्षणं किम्?

२. वेदविभागाः के?

३. वेदस्य अपौरुषेयत्वं किमर्थम्?

४. धर्मप्रमाणानि कानि?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. साधूत्तरं योजयत

१. वेदः	अ) धर्मप्रमाणम्
२. विधिः	आ) पञ्चभागोपेतः
३. सामर्थ्यम्	इ) अपौरुषेयः
४. वेदः	ई) वेदस्य अन्यतमः एकः भागः

३. एकं पृथक् कुरुत

१. एषु एतत् नान्तर्भवति

१) विधिः २) नामधेयम् ३) मन्त्रः ४) निषेधः

४. रिक्तस्थानं पूरयत

१. अपौरुषेयत्वे सति....................वेदः।

२. आचारः, नामधेयम्, वाक्यशेषः...........।

३. मन्त्रः, नामधेयम्, निषेधः,.................।

५. पञ्चाङ्कप्रश्नाः

१. वेदलक्षणं निरूप्य दलकृत्यं निरूपयत?

२. धर्मे कति प्रमाणानि, तानि कानि?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चतुर्थपाठाध्ययनस्य प्रयोजनानि

१. वयम् एनं पाठं पठित्वा विधेः परिचयं प्राप्नुमः। २. विधेः विभागान् अवगच्छामः। ३. विधेः विभागान्तर्गतम् उत्पत्तिविधिं जानीमः। ४. गुणविशिष्टकर्मोत्पत्तिविधेः परिचयं प्राप्नुमः।

विधिः - प्रवर्तनाबोधकं वेदवाक्यम्



उत्पत्तिविधिः - कर्मणः अज्ञातस्वरूपस्य ज्ञापकः विधिः

उदाहरणम् → 'अग्निहोत्रं जुहोति'

गुणविशिष्टकर्मोत्पत्तिविधिः कर्मणः गुणस्य च बोधकः विधिः

उदाहरणम् → सोमेन यजेत

विधिः स्वतन्त्रं प्रमाणम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. चतुर्थः पाठः - १.विधिः

विधिश्च प्रवर्तनाबोधकं वाक्यम्। लिङादिसहितं नञा रहितं च वाक्यं विधिः इति व्यवह्रियते। तेन प्रवर्तना प्रतिपाद्यते। नञ्सहितं वाक्यं निषेधः इति व्यवह्रियते। तेन निवर्तना प्रतिपाद्यते। प्रकृते विधिनिषेधयोः निरूपणं पृथक् क्रियते।

विधिः नाम अज्ञातविषयस्य बोधकं वेदवाक्यम्[१]। अज्ञातार्थज्ञापकः वेदभागः विधिः इति शास्त्रीयं लक्षणम्। अज्ञातार्थज्ञापकत्वे सति वेदभागत्वम् इति विधिलक्षणम्।

विध्यर्थः प्रवर्तना। प्रवर्तना नाम प्रवृत्तिजनकः व्यापारः।

सः विधिः प्रमाणान्तरेण अज्ञातस्य यागादेः विषयस्य विधानेन सार्थकः भवति। यथा 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति। इदं च वाक्यं लिङ्घटितं वाक्यम् इत्यतः विधिः भवति। अयं विधिः अन्येन प्रमाणेन, वाक्येन वा अज्ञातं स्वर्गरूपफलविशिष्टं होमं विदधाति।

'जुहुयात्' इत्यत्र 'तिङ्' इति प्रत्ययस्यार्थः भावना। 'जुहुयात्' इत्यत्र 'हु' धातुः विद्यते। 'हु' इति धातोः अर्थः होमः। 'स्वर्गकामः' इति पदस्य लक्षणया स्वर्गः अर्थः। 'अग्निहोत्रम्' इति होमस्य नाम। फलस्य साध्यत्वेन अन्वयः। फलसन्निधौ श्रूयमाणस्य धात्वर्थस्य साधनत्वेन अन्वयः। तथा च 'अग्निहोत्रनामकेन होमेन स्वर्गं भावयेत्' इति 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति वाक्यस्य अर्थः।

२. विधेः विभागाः

अयं विधिः १. उत्पत्तिविधिः, २. विनियोगविधिः, ३. प्रयोगविधिः, एवं ४. अधिकारविधिः इति चतुर्विधः।

विधिः अज्ञातं प्रयोजनविशिष्टविषयं विधत्ते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



३. उत्पत्तिविधिः

कर्मणः अज्ञातस्य स्वरूपस्य ज्ञापकः विधिः उत्पत्तिविधिः। यागादि-रूपकर्मणः स्वरूपरूपाज्ञातार्थज्ञापकः वेदभागः उत्पत्तिविधिः इति फलति। यथा 'अग्निहोत्रं जुहोति' इति। अनेन विधिना 'अग्निहोत्रम्' इति कर्मणः स्वरूपं बोध्यते। अतः अयं विधिः उत्पत्तिविधिः।

उत्पत्तिविधौ धात्वर्थस्य होमादेः करणत्वेन अन्वयः।

'जुहोति' इत्यत्र 'तिङ्' प्रत्ययार्थः भावना। 'हु' धात्वर्थः होमः। 'अग्निहोत्रम्' इति होमस्य नामधेयम्। फलस्य साध्यत्वेन अन्वयः। प्रकृते फलविशेषस्य अनिर्देशात् इष्टसामान्यस्य साध्यत्वेनान्वयः। तथा च 'अग्निहोत्रनामकेन होमेन इष्टं भावयेत्' इति वाक्यार्थः।



द्रव्यं देवता इति यागस्य रूपद्वयम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. गुणविशिष्टकर्मणः उत्पत्तिविधिः

'सोमेन यजेत' इत्यत्र सोमरूपगुणस्य, यागरूपकर्मणः च अप्राप्तत्वात्, सोमयागयोः विधानं कार्यम्। विधायकस्तु एकः एव 'त' इति प्रत्ययः। अतः विधिना सोमगुणविशिष्टस्य यागरूपकर्मणः विधानं कार्यम्। तेन च 'सोमविशिष्टयागेन इष्टं भावयेत्' इति वाक्यार्थः। एवं विशिष्टं यदि विधातव्यं तर्हि मत्वर्थलक्षणा आवश्यकी। सोमपदे 'सोमवान्' इति मत्वर्थलक्षणा स्वीक्रियते। अस्मिन् वाक्ये फलम् अनिर्दिष्टम्। अतः कस्यचित् इष्टस्य साध्यत्वेन अन्वयः कार्यः। सोमविशिष्टयागस्य साधनत्वेन अन्वयः। तथा च 'सोमवता यागेन इष्टं भावयेत्' इति वाक्यार्थबोधः भवति।

सोमेन यजेत = सोम + टा + यज् – त

सोमः + यागः – भावना

सोमविशिष्टः यागः - भावना

सोमविशिष्टयागेन इष्टं भावयेत्

पञ्चमपाठस्य सारः

विधिः नाम अज्ञातस्य विषयस्य ज्ञापकः वेदस्य एकः विभागः। यथा यजेत स्वर्गकामः इति। यागस्य अनुष्ठानेन स्वर्गः लभ्यते इति अज्ञातः विषयः अनेन वेदवाक्येन ज्ञाप्यते। अतः अयं विधिः भवति।

विधेः चत्वारः विभागाः, उत्पत्तिविधिः, विनियोगविधिः, प्रयोगविधिः, अधिकारविधिः इति। तत्र यागादिकर्मणः स्वरूपम् उत्पत्तिविधिः बोधयति। यथा अग्निहोत्रं जुहोति इति। अयं विधिः अग्निहोत्ररूपकर्मणः स्वरूपं बोधयति। अयं विधिः केवलं कर्म विधत्ते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्वचित् उत्पत्तिविधिः गुणविशिष्टस्य कर्मणः विधानं करोति। अत्र गुणः नाम अङ्गम् इत्यर्थः। यथा सोमेन यजेत इति। अत्र सोमः गुणः। यागः कर्म। अयं विधिः सोमविशिष्टयागस्य विधानं करोति। अतः अयं विधिः गुणविशिष्टकर्मोत्पत्तिविधिः इति उच्यते।

उत्पत्तिविधिवाक्येन विहितः धात्वर्थः सर्वदा करणं भवति। यथा यागेन स्वर्गं भावयेत् इति।

अभ्यासाः

१. एकाङ्कप्रश्नाः

अ. एकेन पदेन उत्तरत

१. विध्यर्थः कः?

२. विधेः कति विभागाः सन्ति?

३. कर्म प्रमाणान्तरेण प्राप्तं चेत् प्राप्तकर्मोद्देशेन किं विधीयते?

४. कर्मणः गुणस्य च अप्राप्ते तत्र विधिना किं विधीयते?

५. उत्पत्तिविधौ धात्वर्थस्य कथमन्वयः?

आ. एकेन वाक्येन समाधत्त

१. विधिः नाम कः?

२. विधेः उदाहरणं किम्?

३. अग्निहोत्रं जुहुयात् स्वर्गकामः इति वाक्यस्य अर्थः कः?

४. विधिना कीदृशः विषयः विधीयते?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

५. कर्मविधायकवाक्यस्य एकम् उदाहरणं किम्?

६. गुणविधायकवाक्यस्य एकम् उदाहरणं किम्?

७. कर्मगुणयो: विधायकं वाक्यं किम्?

८. विधे: चातुर्विध्यं कथम्?

९. उत्पत्तिविधे: लक्षणं किम्?

१०. उत्पत्तिविधे: एकमुदाहरणं किम्?

११. यागस्य रूपं किम्?

१२. अग्निहोत्रं जुहुयात् स्वर्गकाम: इति वाक्यस्य अर्थ: क:?

१३. गुणविशिष्टकर्मोत्पत्तिविधायकवाक्यस्य एकम् उदाहरणं किम्?

२. साधूत्तरं योजयत

१. यागरूपं	अ) गुणविशिष्टकर्मोत्पत्तिविधि:
२. प्रयोगविधि:	आ) उत्पत्तिविधि:
३. विध्यर्थ:	इ) द्रव्यं देवता च
४. अग्निहोत्रं जुहोति	ई) विधिविभाग:
५. सोमेन यजेत	उ) प्रवर्तना

३. एकं पृथक् कुरुत

१. एषु एतत् नान्तर्भवति

१) प्रयोग: ३) विनियोग:

२) अधिकार: ४) सहयोग:

२. असम्बद्धं पृथक् कुरुत

१) कर्मत्वेन ३) करणत्वेन

२) आश्रयत्वेन ४) अधिकरणत्वेन

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. रिक्तस्थानं पूरयत

१. प्रवर्तनाबोधकं वाक्यं....................।

२. अग्निहोत्रं ....।

३. सोमवता यागेन ....।

४. कर्मणः स्वरूपबोधकं वाक्यं...............।

५. पञ्चाङ्कप्रश्नाः

१. विधिं निरूपयत?

२. अग्निहोत्रं जुहोति इति वाक्यार्थः कः?

३. उत्पत्तिविधिं स्पष्टयत?

४. सगुणकर्मोत्पत्तिविधिं व्याख्यात?

६. दशाङ्कप्रश्नः

१. उत्पत्तिविधेः वैशिष्ट्यं प्रतिपादयत?

❀❀❀

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पञ्चमपाठाध्ययनस्य प्रयोजनानि

१. वयम् एनं पाठं पठित्वा निषेधस्य, पर्युदासस्य च परिचयं प्राप्नुमः। २. तस्य व्रतमिति उपक्रमविषये जानीमः। ३. विकल्पप्रसक्तिः कदा इति अवगच्छामः। ४. विकल्पे कति दोषाः सम्भवन्ति। के ते दोषाः इति जानीमः।

निषेधः — पुरुषस्य निवर्तकं वाक्यम्

उदाहरणम् → 'न कलञ्जं भक्षयेत्'

पर्युदासः

नञर्थस्य धात्वर्थेन उपपदार्थेन वा साकम् अन्वये

१. 'तस्य व्रतम्' इति उपक्रमः

२. विकल्पप्रसक्तिः

५. पञ्चमः पाठः - १. निषेधः

निषेधः नाम निवर्तना, प्रतिषेधः वा। निषेधलक्षणं तु पुरुषस्य निवर्तकं वाक्यम् इति। अनर्थकारणीभूतकर्मणः सकाशात् पुरुषस्य निवर्तकं वाक्यम् इति वा। निवर्तना नाम निवृत्तिजनकः व्यापारः। नरकाद्यनर्थं प्रति कारणीभूतात् कलञ्जभक्षणादिक्रियातः निवृत्तिजनकत्वेन निषेधस्य प्रयोजनवत्त्वम्।

यथा 'न कलञ्जं भक्षयेत्' इति। अयं निषेधः निवृत्तिसम्पादनार्थं कलञ्ज-भक्षणस्य अनिष्टसाधनत्वम् आक्षिपति। एवं निषेधः कलञ्जभक्षणातः पुरुषं निवर्तयति।

नञ् एवं लिङ् एतदुभयघटितं वाक्यं निषेधः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

निषेधः = नञ् + विधिः
न + भक्षयेत् = नञ् भक्ष् + त
नञ् भक्ष् + लिङ्
न भक्षयेत् = भक्षणात् निवृत्तिः

२. पर्युदासः

प्रत्ययार्थस्य नञर्थेन साकम् अन्वये बाधकं किञ्चित् विद्यते। तदा धात्वर्थस्य उपपदार्थस्य वा नञर्थेन साकम् अन्वयः भवति, तस्य पर्युदासः इति नाम। प्रत्ययार्थातिरिक्तेन साकं नञर्थस्य अभावस्य अन्वयः यत्र, तत्र पर्युदासः[२]।

तच्च बाधकं द्विविधम्। यथा १.'तस्य व्रतम्' इति उपक्रमः, २. विकल्पप्रसक्तिः इति।

पर्युदासः = नञ् + धात्वर्थः = ईक्षणम् + त
न ईक्षेत = ईक्षणभिन्नं कुर्यात्

निषेधः = नञ् + त - लिङ् = विधिः
न भक्षयेत् = भक्षणं न कुर्यात्

पर्युदासकारणम्

१. तस्य व्रतम् - - - -न ईक्षेत उद्यन्तम् आदित्यम्।
अत्र उद्यन्तम् आदित्यं नेक्षिष्ये इति सङ्कल्पे लक्षणा।

२. विकल्पप्रसक्तिः- यजतिषु येयजामहं करोति, नानुयाजेषु।
अत्र अनुयाजव्यतिरिक्ते येयजामहं कुर्यात् इति अर्थः।

निवृत्तिजनकं वाक्यं निषेधः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. तस्य व्रतम्

'तस्य व्रतम्' इति स्नातकम् उद्दिश्य विधिना कर्तव्यं किञ्चित् विहितम्। स्नातकः नाम गुरुकुलात् समावृतः। उपक्रमे 'तस्य व्रतम्' इति विद्यते। तस्य - स्नातकस्य, व्रतम् - कर्तव्यं किञ्चित् इति अर्थः। 'न ईक्षेत उद्यन्तम् आदित्यम्' इति उपसंहारे विद्यते। तस्य उद्यतः अस्तंयतः आदित्यस्य ईक्षणं न कार्यम् इति अर्थः। उपक्रमोपसंहाराभ्याम् एकार्थः प्रतिपादनीयः। तदैव उपक्रमोपसंहारयोः एकवाक्यता सम्भवति। व्रतशब्दस्य च कर्तव्यार्थत्वात्, एकवाक्यतासम्पादनाय उपसंहारेऽपि कर्तव्यार्थः एव वक्तव्यः। तथा च 'स्नातकेन किं कर्तव्यम्' इति अपेक्षायां 'नेक्षेतोद्यन्तम् आदित्यम्' इत्यत्रापि कर्तव्यार्थः एव वक्तव्यः। इतरथा प्रतीयमानायाः एकवाक्यतायाः उपपत्तिः न स्यात्। यदि प्रत्ययार्थस्य नञर्थेन साकम् अन्वयः क्रियते, तदा निवर्तनायाः प्रतीयमानत्वात् कर्तव्यार्थः न प्रतीयते। अतः प्रत्ययातिरिक्तार्थस्य नञर्थेन साकम् अन्वयं सम्पाद्य अर्थः वर्णनीयः। तथा च 'नेक्षेत' इत्यनेन अनीक्षणसङ्कल्पः एव नञीक्षतिभ्यां लक्ष्यते। सङ्कल्पश्चेत् कर्तुं शक्यः। तस्य च पापक्षयरूपं फलम् 'एतावता हैनसा विमुक्तो भवति' इति अर्थवादः समर्पयति।

तथा च नेक्षेतोद्यन्तमादित्यम् इत्यस्य अर्थस्तु 'आदित्यविषयकानीक्षणसंकल्पेन पापक्षयं भवयेत्' इति।



नञर्थस्य विध्यतिरिक्तेन साकम् अन्वये पर्युदासः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. विकल्पप्रसक्तिः

विकल्पप्रसक्तौ पर्युदासस्वीकारे उदाहरणं तु 'यजतिषु येयजामहं करोति, नानुयाजेषु' इति।

'यजतिषु येयजामहं करोति' इत्युक्ते यजतिषु - सर्वेषु यागेषु याज्यामन्त्राणाम् आदौ येयजामहशब्दं योजयेत् इति अर्थः। नानुयाजेषु नाम अनुयाजेषु येयजामहः न वक्तव्यः इति अर्थः।

यद्यत्र प्रत्ययार्थस्य नञर्थेन अन्वयः क्रियते तदा 'अनुयाजेषु येयजामहमन्त्रः न वक्तव्य' इति प्रतिषिध्यते। प्रतिषेधस्तु पूर्वं प्राप्तस्यैव भवति। तर्हि अनुयाजेषु येयजामहप्रापकं शास्त्रं 'यजतिषु येयजामहं करोति' इति भवेत्। एवं शास्त्रप्राप्तस्य शास्त्रेणैव निषेधे विकल्पः एव स्यात्, समबलत्वात्। न तु बाधः। बाधस्तु तदा एव भवति यदि रागतः प्राप्तिः, प्रतिषेधः शास्त्रेण क्रियते।

विकल्पप्रसक्तौ प्रतिषेधः परित्याज्यः। पर्युदासाश्रयणे तु न विकल्पप्रसक्तिः। तथा च पर्युदासमाश्रित्य अनुयाजभिन्नेषु येयजामहमन्त्रः वक्तव्यः इति अर्थः वर्णनीयः।



विकल्पः सति सम्भवे परित्याज्यः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

५. विकल्पे अष्टौ दोषाः

'व्रीहिभिः यजेत', 'यवैः यजेत' इत्यत्र तु विकल्पः एव अश्रीयते।

'व्रीहिभिर्यजेत', 'यवैः यजेत' इत्यत्र एकधा शास्त्रद्वयोक्तस्य अनुष्ठानं न सम्भवति। अतः एकं शास्त्रं परिग्राह्यम्, अपरं च परित्याज्यं भवति। परं शास्त्रद्वयमपि प्रमाणम्।

१.यदि व्रीहिशास्त्रस्य परिग्रहः तदा यवशास्त्रं परित्याज्यम्। तदा च यवशास्त्रस्य अनुष्ठापकत्वलक्षणस्य प्रामाण्यस्य परित्यागः इति एकः दोषः।

२. यवशास्त्रस्य अप्रतीतस्य अननुष्ठापकत्वलक्षणस्य अप्रामाण्यस्य स्वीकारः इति अपरः दोषः।

३. तेनैव कर्त्रा प्रयोगान्तरे यवशास्त्रस्य ग्रहणे यवशास्त्रे परित्यक्तस्य प्रामाण्यस्य स्वीकारः इति तृतीयः दोषः।

४. यवशास्त्रस्य स्वीकृतस्य अप्रामाण्यस्य परित्यागः इति चतुर्थः दोषः। एवं यवशास्त्रे चत्वारः दोषाः सम्भवन्ति।

५.यदि यवशास्त्रस्य पूर्वं परिग्रहः तदा व्रीहिशास्त्रं परित्याज्यम्। तदा च व्रीहिशास्त्रस्य प्रामाण्यपरित्यागः इति एकः दोषः।

६. व्रीहिशास्त्रस्य अप्रतीतस्य अप्रामाण्यस्य स्वीकारः इति अपरः दोषः।

७. तेनैव कर्त्रा प्रयोगान्तरे व्रीहिशास्त्रस्य ग्रहणे व्रीहिशास्त्रे परित्यक्तस्य प्रामाण्यस्य स्वीकारः इति तृतीयः दोषः।

८. व्रीहिशास्त्रस्य स्वीकृतस्य अप्रामाण्यस्य परित्यागः इति चतुर्थः दोषः।

एवं व्रीहिशास्त्रे चत्वारः दोषाः सम्भवन्ति। एवम् आहत्य अष्टौ दोषाः विकल्पस्य आश्रयणे सम्भवन्ति।

विकल्पे पाक्षिकाप्रामण्याद्यष्टौ दोषाः भवन्ति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विकल्पाश्रयणे अष्टौ दोषाः

'व्रीहिभिर्यजेत', 'यवैर्वा'

व्रीहिशास्त्रस्य पूर्वं परिग्रहे

दोषाः	
	यवशास्त्रे चत्वारः दोषाः
१	१. अनुष्ठापकत्वलक्षणप्रामाण्यपरित्यागः
२	२. अप्रतीताननुष्ठापकत्वलक्षणाप्रामाण्यस्वीकारः
	प्रयोगान्तरे यवशास्त्रस्य ग्रहणे
३	१. परित्यक्तप्रामाण्यस्वीकारः
४	२. स्वीकृताप्रामाण्यपरित्यागः

यवशास्त्रस्य पूर्वं परिग्रहे

दोषाः	
	व्रीहिशास्त्रे चत्वारः दोषाः
५	१. प्रामाण्यपरित्यागः
६	२. अप्रतीताप्रामाण्यस्वीकारः
	प्रयोगान्तरे व्रीहिशास्त्रस्य ग्रहणे
७	१. परित्यक्तप्रामाण्यस्वीकारः
८	२. स्वीकृताप्रामाण्यपरित्यागः

विकल्पः समानबलयोः एव भवति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पञ्चमपाठस्य सारः

निषेधः इति वेदस्य एकः विभागः। निषेधः नाम नरकाद्यनर्थ-फलजनककर्मभ्यः पुरुषस्य निवृत्तिजनकं वाक्यम्। नञ्सहितं विधिवाक्यम् इति सुलभतया वक्तुं शक्यते। नञर्थस्य अभावस्य विध्यर्थेन साकम् अन्वयः क्रियते चेत् निषेधः भवति। यथा 'न कलञ्जं भक्षयेत्' इति। कलञ्जभक्षणम् अनर्थजनकम्। अतः अयं निषेधः कलञ्जभक्षणात् निवृत्तिं सम्पादयति।

नञर्थस्य अभावस्य विध्यर्थातिरिक्तेन साकम् अन्वयः क्रियते चेत् पर्युदासः इति नाम भवति। यथा 'नेक्षेत उद्यन्तम् आदित्यम्' इति। अत्र विध्यर्थेन साकं नञर्थस्य अन्वयः न क्रियते। अपि तु तद्भिन्नार्थेन साकम् अन्वयः क्रियते। अतः अयं पर्युदासः।

यदि अत्र विध्यर्थेन अन्वयः नञर्थस्य क्रियते, तर्हि उपक्रमविरोधः भवति। अतः अयं न निषेधः। अपि तु पर्युदासः।

एवं 'यजतिषु येयजामहं करोति, नानुयाजेषु' इत्यत्र। अत्र निषेधः इत्यङ्गीकारे विकल्पः प्रसज्यते। विकल्पे च अष्टौ दोषाः भवन्ति। सः च न युक्तः।

विकल्पे तु आवृत्त्या प्रामाण्यपरित्यागः, अप्रामाण्यस्वीकारः, परित्यक्तप्रामाण्यस्वीकारः, स्वीकृताप्रामाण्यपरित्यागः इत्येवं चत्वारः दोषाः, पक्षद्वये अष्टौ दोषाः भवन्ति।

उक्तं च भट्टकेशवेन -

'स्वान्यानुष्ठानवेलायां प्रामाण्यतदभावयोः।
त्यागस्वीकारयोः भेदे विकल्पस्य अष्टदोषता।।' इति।

निषेधस्य अर्थः निवर्तना

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



अभ्यासाः

१. एकाङ्कप्रश्नाः

अ. एकेन पदेन उत्तरत

१. निषेधार्थः कः?

२. आदित्येक्षणाभावसङ्कल्पस्य किं फलम्?

३. 'तस्य व्रतम्' इत्यत्र तस्य नाम कस्य?

४. यजतिषु इत्यस्य कः अर्थः?

५. शास्त्रप्राप्तस्य शास्त्रेणैव निषेधे किं भवति?

६. विकल्पे कति दोषाः सम्भवन्ति?

आ. एकेन वाक्येन समाधत्त

१. निषेधो नाम कः?

२. निषेधस्योदाहरणं किम्?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. प्रत्ययार्थेन साकं नञर्थान्वये बाधकं किम्?

४. विकल्पे प्रसिद्धम् उदाहरणं किम्?

५. कुत्र विकल्पप्रसक्तौ पर्युदासाश्रयणम्?

६. नेक्षेतोद्यन्तम् इति वाक्यस्य कः अर्थः?

७. पर्युदासः नाम कः?

८. व्रतानुष्ठानस्य पापक्षयरूपफलबोधकं वाक्यं किम्?

९. निषेधे बाधकं किम्?

२. साधूत्तरं योजयत

१. नानुयाजेषु	अ) पर्युदासः
२. विकल्पे	आ) निषेधः
३. तस्य व्रतम्	इ) प्रतिषेधः
४. न कलञ्जं भक्षयेत्	ई) अष्टौ दोषाः
५. निवर्तना	उ) विकल्पापातः

३. एकं पृथक् कुरुत

१. एषु एतत् नान्तर्भवति

१) न कलञ्जं भक्षयेत् ३) अग्निहोत्रं जुहोति

२) नानुयाजेषु ४) तस्य व्रतम्

२. असम्बद्धं पृथक् कुरुत

१) न कलञ्जं भक्षयेत् ३) तस्य व्रतम्

२) नानुयाजेषु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. रिक्तस्थानं पूरयत

१. निवृत्यनुकूलः व्यापारः.....।

२. न कलञ्जं ....।

३. नेक्षेतोद्यन्तम् ....।

४. यजतिषु ....।

५. पञ्चाङ्कप्रश्नाः

१. निषेधं विवृणुत ?

२. 'तस्य व्रतम्', निरूपयत ?

३. विकल्पप्रसक्तौ निषेधः उत पर्युदासः, विशदयत ?

६. दशाङ्कप्रश्नः

१. पर्युदासः कदा भवति, उदाहरणद्वयं व्याख्यात ?

२. विकल्पे कति दोषाः भवन्ति, ते के, उदाहरत ?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

षष्ठपाठाध्ययनस्य प्रयोजनानि

१. वयम् एनं पाठं पठित्वा अर्थवादस्य परिचयं प्राप्नुमः। २. अर्थवादस्य भेदज्ञानं सम्पादयामः। ३. विधेः शेषम्, निषेधस्य शेषं च जानीमः। ४. अर्थवादस्य भेदत्रयम्, एकवाक्यतां च अवगच्छामः।

अर्थवादः - प्राशस्त्यस्य अथवा निन्दायाः बोधकं वाक्यम्

उदाहरणम् → 'वायुर्वै क्षेपिष्ठा देवता'







विध्यपेक्षितस्तुतिनिन्दे अर्थवादः समर्पयति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

६. षष्ठः पाठः - १. अर्थवादः

अर्थवादः इति धर्मे अन्यतमं प्रमाणम्। प्राशस्त्यस्य अथवा निन्दायाः बोधकं वेदवाक्यम् अर्थवादः[३]। अर्थवादेन प्रतिपाद्यस्य शक्यार्थस्य स्वीकारे न किञ्चित् प्रयोजनं विद्यते। अतः लक्षणया विधिवाक्यस्य कृते अपेक्षितं प्राशस्त्यं प्रतिपादनीयम्। एवं निषेधवाक्यस्य कृते अपेक्षितम् अप्राशस्त्यम् अर्थवादेन लक्षणया प्रतिपादनीयम्। एवं विधिनिषेधापेक्षिते प्राशस्त्याप्राशस्त्ये अर्थवादेन समर्प्येते इत्यतः अर्थवादस्य सार्थक्यं सम्भवति।



२. अर्थवादविभागौ

अर्थवादः १.विधिशेषः, २.निषेधशेषः चेति द्विविधः।

स्तुतिनिन्दान्यतरबोधकं वेदवाक्यम् अर्थवादः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center





३. - १. विधिशेष:

'वायव्यं श्वेतम् आलभेत भूतिकाम:' इति विधि:। तस्य समीपे श्रूयमाण: 'वायुर्वै क्षेपिष्ठा देवता' इति अर्थवाद: विधिशेष:। विधिना वायुदेवताक:, श्वेतपशु(छाग)द्रव्यक:, ऐश्वर्यफलक: याग: विहित:। 'वायुदेवताकेन श्वेतपशुद्रव्यकेन यागेन ऐश्वर्यं सम्पादयेत्' इति अस्य विधे: वाक्यार्थ:। अर्थवाद: विधिविहितं यागं स्तौति।

विधिवाक्यार्थवादवाक्ययो: पदैक्यवाक्यत्वम् अङ्गीकृतम्। तथा च 'वायुदेवताक:, श्वेतपशुद्रव्यक:, ऐश्वर्यफलक: याग: प्रशस्त:' इति वाक्यार्थ:।

विध्यर्थवादस्य विधेयस्य यागादे: प्राशस्त्यप्रतिपादनद्वारा प्रामाण्यम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. - २. निषेधशेषः

'बर्हिषि रजतं न देयम्' इति निषेधः। तस्य सन्निधौ श्रूयमाणः 'सः अरोदीत् यत् अरोदीत् तत् रुद्रस्य रुद्रत्वम्' इति अर्थवादः निषेधशेषः। निषेधेन निषेध्यं रजतदानम्। अयम् अर्थवादः रजतदानस्य निन्दां प्रतिपादयति। यागमण्डपे रजतस्य दानम् अप्रशस्तम् इति एकवाक्यतापन्नयोः निषेधनिषेधशेषयोः अर्थः।





अयम् अर्थवादः प्रकारान्तरेण त्रेधा विभक्तः। यथा १.गुणवादः, २.अनुवादः, ३.भूतार्थवादः इति। उक्तं च वार्तिके -

> 'विरोधे गुणवादः स्यात् अनुवादोऽवधारिते।
> भूतार्थवादः तद्धानात् अर्थवादः त्रिधा मतः।।'

निषेधार्थवादस्य निषेध्यस्य निन्दाप्रतिपादनद्वारा प्रामाण्यम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



५. अर्थवादस्य भेदत्रयम्

१. गुणवादः

प्रत्यक्षादिप्रमाणैः विरोधे सति अर्थवादः गुणवादः। यथा 'आदित्यो यूपः' इति। आदित्यः नाम सूर्यः। यूपः नाम पशुबन्धनार्थं विद्यमानः काष्ठविशेषः। अनेन अर्थवादेन आदित्ययूपयोः अभेदः उक्तः। सः प्रत्यक्षप्रमाणेन बाधितः। अतः अयम् अर्थवादः गुणवादः। विरोधवशात् आदित्यशब्देन आदित्ये विद्यमानः उज्ज्वलत्वगुणः लक्ष्यते। तादृशगुण-योगात् आदित्यपदं यूपस्तावकम्।

२. अनुवादः

प्रत्यक्षादिप्रमाणान्तरेण ज्ञातस्य विषयस्य प्रतिपादकः अर्थवादः अनुवादः। 'अग्निः हिमस्य भेषजम्' इति। अग्निः हिमस्य औषधम् इति प्रत्यक्षप्रमाणेन अवगम्यते। सः एव अर्थः अर्थवादेनापि उच्यते। अतः अयम् अर्थवादः अनुवादः इति कथ्यते।

अर्थवादानां लक्षणया स्तुतिनिन्दाप्रतिपादकत्वम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. भूतार्थवादः

प्रत्यक्षादिप्रमाणान्तरेण विरोधरहितः, प्रत्यक्षादिप्रमाणान्तरेण अज्ञातस्य विषयस्य प्रतिपादकः अर्थवादः भूतार्थवादः। यथा 'इन्द्रो वृत्राय वज्रम् उदयच्छत'। अत्र प्रत्यक्षादिप्रमाणान्तरविरोधः नास्ति। एवं प्रत्यक्षादिप्रमाणान्तरेण अवगतार्थः अपि नास्ति। अतः अयम् अर्थवादः भूतार्थवादः। भूतम् - सिद्धम् अर्थं वदतीति भूतार्थवादः।



६. एकवाक्यता

एकवाक्यता द्विविधा १. पदैकवाक्यता, २. वाक्यैकवाक्यता इति।



विधिवाक्येन एकवाक्यतां सम्पाद्य अर्थवादानां प्रामाण्यम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१. पदैकवाक्यता - वाक्यद्वयेन पृथक् अर्थः समर्प्यते। तथापि तादृशे अर्थे वाक्यस्य तात्पर्यं न भवति। अतः तात्पर्यवशेन शक्यार्थं त्यक्त्वा अन्यार्थं स्वीकृत्य एकवाक्यता यत्र कल्प्यते, तत्र पदैकवाक्यता इति व्यवहारः। यथा विधिवाक्यार्थवादवाक्ययोः। विधिः यागादिविधानेन स्वार्थं समर्पयति। अर्थवादस्तु शक्त्या लोके अवगतं धर्माधर्मासम्बद्धञ्च अर्थं प्रतिपादयति। अतः अर्थवादे विद्यमानानि सर्वाणि पदानि मिलित्वा प्राशस्त्यरूपम् अर्थं लक्षणया प्रतिपादयन्ति। अर्थवादेन पदार्थरूपेण समर्पितस्य प्राशस्त्यस्य विधौ अन्वयात् पदैकवाक्यता इति उच्यते।



यथा वायव्यं श्वेतम् आलभेत इत्यनेन विधिना वायुदेवताकः श्वेतपशुद्रव्यकः यागः विहितः। तादृशयागस्य विधानेन विधानेन विधेः कार्यं समाप्तम्। तस्य विधेः सन्निधौ अर्थवादः श्रूयते, वायुर्वै क्षेपिष्ठा देवता इति। नाम वायुः क्षिप्रगमनशीला देवता इति। सः अर्थः प्रत्यक्षेणैव

विध्यर्थवादयोः पदैकवाक्यता भवति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ज्ञातः। अतः अस्य वेदवाक्यस्य धर्माधर्मोपयोग्यर्थसमर्पकत्वं नास्ति। अतः इदं वाक्यम् अप्रमाणं स्यात्। अतः लक्षणया अज्ञातार्थः प्रतिपादनीयः। सः अर्थः विध्यपेक्षितश्च स्यात्। विधिना तु स्वविधेये यागे पुरुषाणां प्रवृत्तिसम्पादनार्थं प्राशस्त्यम् अपेक्षते। अतः अर्थवादः तादृशप्राशस्त्यं समर्पयति। तथा च वायुदेवताकः यागः प्रशस्तः, कर्तव्यः इति अर्थः एकवाक्यतापन्नयोः विध्यर्थवादयोः अर्थः।

२. वाक्यैकवाक्यता - यत्र वाक्यद्वयं स्वार्थं समर्पयति चेदपि अङ्गाङ्गिभावाद्याकाङ्क्षायां पुनः वाक्यद्वयेन समर्पितयोः अर्थयोः अन्वयः क्रियते, तत्र वाक्यैकवाक्यता इति व्यवहारः। उक्तञ्च -

'स्वार्थबोधे समाप्तानाम् अङ्गाङ्गित्वव्यपेक्षया।
वाक्यानाम् एकवाक्यत्वं पुनः संहत्य जायते।।'



अङ्गप्रधानवाक्ययोः वाक्यैकवाक्यता भवति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यथा - 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति वाक्यं प्रधानयागं विधत्ते। दर्शपूर्णमासाभ्यां स्वर्गं भावयेत् इति तस्यार्थः। 'समिधो यजति' इति वाक्यमपि प्रयाजरूपस्य अङ्गस्य विधानं करोति। समिद्यागेन भावयेत् इति तस्यार्थः। एवं स्वार्थसमर्पणे समाप्तयोः अपि वाक्ययोः पुनः उपकारकोपकार्याकाङ्क्षावशात् 'समिदाद्यङ्गयागोपकृताभ्यां दर्शपूर्ण-मासाभ्यां स्वर्गं भावयेत्' इति अन्वयः क्रियते। तत्र वाक्यैकवाक्यता इति व्यवहारः।

एवम् अर्थवादविधिवाक्ययोः पदैकवाक्यता, अङ्गवाक्यप्रधानवाक्ययोः वाक्यैकवाक्यता च सम्भवति।

अर्थवादेन समर्पितः प्राशस्त्यरूपः अर्थः विधौ अन्वेति। विध्यर्थवादयोः पदैकवाक्यता मीमांसकैः अङ्गीकृता।

षष्ठपाठस्य सारः

अर्थवादः इति वेदस्य एकः विभागः। स्तुतेः अथवा निन्दायाः बोधकं वेदवाक्यम् अर्थवादः। अर्थवादः स्तुतिनिन्दारूपम् अर्थं लक्षणया समर्पयति। अर्थवादः विधिशेषः, निषेधशेषः इति द्वेधा विभक्तः। तत्र 'वायुर्वै क्षेपिष्ठा देवता' इति अर्थवादः विधिशेषः। अयम् अर्थवादः विधेयं यागं स्तौति। 'सः अरोदीत् यत् अरोदीत् तत् रुद्रस्य रुद्रत्वम्' इति अर्थवादः निषेधशेषः। अयं निषेध्यं रजतदानं निन्दति।

अर्थवादस्य प्रकारान्तरेण भेदत्रयं विद्यते। यथा गुणवादः, अनुवादः, भूतार्थवादः चेति। प्रमाणान्तरेण विरोधे सति गुणवादः। यथा 'आदित्यो यूपः' इति। अनेन अर्थवादेन आदित्ययूपयोः अभेदः उक्तः। सः प्रत्यक्षप्रमाणेन बाधितः। अतः अयम् अर्थवादः गुणवादः। प्रमाणान्तरेण ज्ञातार्थः उच्यते चेत् अनुवादः। यथा 'अग्निः हिमस्य भेषजम्' इति।

अर्थवादः विधिशेषतया प्रमाणम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अत्र अग्निः हिमस्य औषधम् इति अर्थः प्रत्यक्षप्रमाणेन ज्ञातः। अज्ञातस्य अविरुद्धस्य अर्थस्य प्रतिपादकः अर्थवादः भूतार्थवादः। यथा 'इन्द्रो वृत्राय वज्रम् उदयच्छत'।

षष्ठः पाठः
अभ्यासाः

१. एकाङ्कप्रश्नाः

अ. एकेन पदेन उत्तरत

१. अर्थवादेन लक्षणया कीदृशः अर्थः प्रतिपाद्यते?

२. विधेः अर्थवादेन समर्पितस्य कीदृशस्य अर्थस्यापेक्षा?

३. निषेधस्य अर्थवादेन समर्पितस्य कीदृशस्य अर्थस्यापेक्षा?

आ. एकेन वाक्येन समाधत्त

१. को नाम अर्थवादः?

२. अर्थवादभेदौ कौ?

३. अर्थवादत्रैविध्यं किम्?

४. अर्थवादानां शक्यार्थः कुतः त्यज्यते?

५. विधिशेषः कः?

६. निषेधशेषः कः?

७. विधिशेषस्यार्थः कः?

८. गुणवादः नाम कः?

९. गुणवादस्य उदाहरणं किम्?

१०. अनुवादः नाम कः?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

११. अनुवादस्योदाहरणं किम्?

१२. कः भूतार्थवादः भवति?

१३. भूतार्थवादस्योदाहरणं किम्?

१४. एकवाक्यतायाः द्वैविध्यं किम्?

१५. पदैकवाक्यता कुत्र भवति?

१६. वाक्यैकवाक्यता कुत्र भवति?

२. साधूत्तरं योजयत

१. वायव्यं श्वेतम् आलभेत	अ) गुणवादः
२. बर्हिषि न देयम्	आ) निषेधशेषः
३. सोरोदीत्	इ) विधिः
४. वायुर्वै क्षेपिष्ठा देवता	ई) निषेधः
५. आदित्यो यूपः	उ) अनुवादः
६. अग्निः भेषजम्	ऊ) विधिशेषः

३. एकं पृथक् कुरुत

१. एषु एतत् नान्तर्भवति

१) आदित्यो यूपः ३) वायुर्वै क्षेपिष्ठा देवता

२) अग्निः भेषजम् ४) वायव्यं श्वेतम् आलभेत

२. असम्बद्धं पृथक् कुरुत

१) विधिशेषः ३) अनुवादः

२) गुणवादः ४) भूतार्थवादः

३. एकं निवारयत

१) अपवादः ३) अनुवादः

२) गुणवादः ४) भूतार्थवादः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. रिक्तस्थानं पूरयत

१. वायुर्वै क्षेपिष्ठा............।

२. सोऽरोदीत्.... ....।

३. वायव्यं श्वेतं..............।

४. बर्हिषि....................।

५. विरोधे गुण................।

५. पञ्चाङ्कप्रश्नाः

१. अर्थवादेन किमर्थं प्राशस्त्यं प्रतिपाद्यते?

२. अर्थवादविभागौ व्याख्येयौ?

३. पदैकवाक्यता कुत्र भवति?

४. वाक्यैकवाक्यता कुत्र भवति?

६. दशाङ्कप्रश्नः

१. अर्थवादानां विभागत्रयं निरूपयत?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सप्तमपाठाध्ययनस्य प्रयोजनानि

१. वयम् एनं पाठं पठित्वा मन्त्रस्य परिचयं प्राप्नुमः। २. विधेः विभागत्रयं जानीमः।

पाठे अन्तर्गताः प्रधानविषयाः — **मन्त्रलक्षणम्, उदाहरणम्**



७. सप्तमः पाठः - १. मन्त्रः

अयं धर्मे तृतीयं प्रमाणम्। अनुष्ठानसम्बद्धस्य अर्थस्य प्रकाशकः मन्त्रः[४]। यागादीनाम् अनुष्ठानकाले मन्त्रोच्चारणं क्रियते। यथा **उरु प्रथस्व** इत्यादि। तच्च मन्त्रोच्चारणम् अदृष्टार्थं न क्रियते। अपि तु द्रव्यदेवतादि-रूपस्य यागीयविषयस्य स्मरणार्थं क्रियते। 'दृष्टे फले सम्भवति सति अदृष्टफलकल्पनम् अन्याय्यम्' इति नियमेन अनुष्ठानसम्बद्धार्थस्य स्मरणमेव मन्त्राणां प्रयोजनम्। यद्यपि अर्थस्मरणं लिखितपाठादिनापि सम्भवति, तथापि 'मन्त्रैरेव मन्त्रार्थः स्मर्तव्यः' इति नियमविधिवशात् मन्त्रम् उच्चार्यैव अर्थः स्मर्तव्यः।



मन्त्राणाम् अनुष्ठानकालीनार्थस्मारकत्वेनैव प्रामाण्यम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. विधिनिरूपणावसरे विधेः चातुर्विध्यं वर्णितम्। सम्प्रति प्रकारान्तरेण विधित्रैविध्यं निरूप्यते।



१. अपूर्वविधिः

प्रत्यक्षादिप्रमाणेन अप्राप्तस्य विषयस्य प्रापकः 'यजेत स्वर्गकामः' इत्यादिविधिः अपूर्वविधिः[५]। यागः स्वर्गार्थः इति अन्येन प्रमाणेन अप्राप्तम्। अतः स्वर्गार्थं यागस्य विधायकः विधिः अपूर्वविधिः।

२. नियमविधिः

पक्षे अप्राप्तस्य विषयस्य प्रापकः विधिः नियमविधिः[६]। यथा 'व्रीहीन् अवहन्ति' इति। नखविदलनपक्षे अप्राप्तस्य अवहननस्य बोधकः विधिः नियमविधिः। कश्चित् तुषविमोकार्थम् अवहननं त्यक्त्वा नखविदलनमिति उपायान्तरं ग्रहीतुम् आरभते। तदा अवघातस्य अप्राप्तत्वात् अप्राप्तांशस्य

अत्यन्ताप्राप्तार्थस्य प्रापकः विधिः अपूर्वविधिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अवघातस्य प्रापकः 'व्रीहीन् अवहन्ति' इति विधिः नियमविधिः। नियमः नाम अप्राप्तांशस्य पूरणम्।

३. परिसङ्ख्याविधिः

पक्षद्वयस्य युगपत् प्राप्तौ अन्यतरस्य पक्षस्य व्यावृत्तिबोधकः विधिः[७]। यथा - 'पञ्च पञ्चनखाः भक्ष्याः' इति। पञ्चनखोपेतस्य प्राणिनः भक्षणं रागतः एव प्राप्तम्। अतः अयं विधिः भक्षणं न विदधाति। अतः अयम् अपूर्वविधिः न भवति। पञ्चनखापञ्चनखोपेतस्य भक्षणस्य पाक्षिकप्राप्त्यभावात्, युगपदेव प्राप्तत्वात् अयं नियमविधिः न भवति। अतः परिशेषात् पञ्चातिरिक्तपञ्चनखभक्षणस्य निवृत्तिं विधदत् परिसंख्याविधिः भवति। परि-वर्जनम्, संख्या-बुद्धिः। परिसंख्या १. श्रौती परिसंख्या, २. लाक्षणिकी परिसंख्या इति द्विविधा।



१. श्रौती परिसंख्या

'अत्र हि एव आवपन्ति'[८] इत्यत्र स्तोत्रेषु सामावापसन्दर्भे एवकारेण पवमानातिरिक्तानां स्तोत्राणां व्यावृत्तिः क्रियते। अतः श्रौती परिसंख्या।

नियमः नाम अप्राप्तांशस्य पूरणम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. लाक्षणिकी परिसंख्या

'पञ्च पञ्चनखा: भक्ष्या:'[१] इत्यत्र तु लाक्षणिकी परिसंख्या। निवृत्तिबोधकानाम् एवकारादीनाम् अभावात् लक्षणया इतरनिवृत्ति: बोधनीया। अत्र लक्षणया इतरनिवृत्ति: बोधनीया इति परिसंख्या लाक्षणिकी भवति।

परिसंख्यायां दोषत्रयम्

लक्षणया निवृत्ते: बोधनात् इयं परिसंख्या १. श्रुतहानि:, २. अश्रुतकल्पना, ३. प्राप्तबाध: इति त्रिदोषग्रस्ता।

१. पञ्चपञ्चनखभक्षणं श्रुतं चेदपि तस्य परित्यागात् श्रुतहानि:।

२. पञ्चातिरिक्तानां पञ्चनखप्राणिनां भक्षणस्य निवृत्ति: अश्रुता। तथापि तस्या: कल्पनात् अश्रुतकल्पना।

३. इच्छया प्राप्तस्य पञ्चातिरिक्तपञ्चनखभक्षणस्य बाधनात् प्राप्तबाध:।

अत्र श्रुतहानि:, अश्रुतकल्पना च शब्दनिष्ठा, प्राप्तबाध: अर्थनिष्ठ:।

अनुष्ठानसमवेतार्थबोधकानां मन्त्राणाम् उच्चारणम् अर्थस्मरणरूपदृष्टार्थं क्रियते। अनुष्ठानासमवेतार्थबोधकानां मन्त्राणाम् उच्चारणन्तु अदृष्टार्थं क्रियते। एवं समेषां मन्त्राणां दृष्टार्थकत्वेन अदृष्टार्थकत्वेन वा प्रामाण्यम्।



परिसंख्या नाम वर्जनबुद्धि:

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सप्तमपाठस्य सारः

वेदस्य अन्यतमः विभागः मन्त्रः इति। मन्त्रः अनुष्ठेयं विषयं स्मारयति। अनुष्ठेयार्थस्य स्मरणमेव मन्त्रस्य प्रयोजनम्। प्रकारान्तरेणापि अर्थः लभ्यते चेदपि मन्त्रेणैव स्मारितार्थः स्वीकार्यः इति निमयः कल्प्यते।

विधिः प्रकारान्तरेण त्रिविधः। यथा अपूर्वविधिः, नियमविधिः, परिसङ्ख्याविधिः चेति। अज्ञातस्य विषयस्य प्रापकः अपूर्वविधिः। यथा 'यजेत स्वर्गकामः' इति। यागानुष्ठानेन स्वर्गः प्राप्यते इति अत्र अज्ञातः विषयः। पक्षे अप्राप्तस्य विषयस्य प्रापकः विधिः नियमविधिः। यथा 'व्रीहीन् अवहन्ति'। अयं विधिः नखविदलनपक्षे अप्राप्तम् अवहननं बोधयति। पक्षद्वयस्य युगपत् प्राप्तौ अन्यतरस्य व्यावर्तकः विधिः परिसङ्ख्याविधिः। यथा - 'पञ्च पञ्चनखाः भक्ष्याः' इति। पञ्चपञ्चनखानां पञ्चातिरिक्तपञ्चनखानां च प्राणिनः भक्षणं युगपदेव प्राप्तम्। अतः पञ्चातिरिक्तपञ्चनखभक्षणस्य निवृत्तिं सम्पादयति परिसङ्ख्याविधिः।

सप्तमः पाठः
अभ्यासाः

१. एकाङ्कप्रश्नाः

अ. एकेन पदेन उत्तरत

१. अनुष्ठेयार्थस्मारकः कः?

२. मन्त्राणां किं प्रयोजनम्?

३. पक्षे अप्राप्तस्य प्रापकः कः?

४. इतरव्यावृत्तिबोधकपदाभावे कीदृशी परिसंख्या?

५. इतरव्यावृत्तिबोधकपदसत्वे कीदृशी परिसंख्या?

मन्त्राणां प्रामाण्याभावेपि प्रयोजनवत्त्वं तु सम्भवति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आ. एकेन वाक्येन समाधत्त

१. मन्त्र: क: भवति?
२. मन्त्रस्य लक्षणं किम्?
३. विधित्रैविध्ये के के विधय: भवन्ति?
४. अपूर्वविधे: किमुदाहरणम्?
५. अपूर्वविधि: क:?
६. नियमविधि: नाम क:?
७. नियमविधे: उदाहरणं किम्?
८. परिसंख्याविधे: उदाहरणं किम्?
९. क: परिसंख्याविधि: भवति?
१०. लाक्षणिकपरिसंख्याया: किम् उदाहरणम्?
११. लाक्षणिकपरिसंख्या कदा भवति?
१२. किं परिसंख्याविधे: लक्षणम्?
१३. परिसंख्याया: विभागा: के?
१४. श्रौतपरिसंख्याया: उदाहरणं किम्?
१५. कस्यां परिसंख्यायां दोषत्रयं भवति?
१६. परिसंख्यायां जायमानं दोषत्रयं किम्?

२. साधूत्तरं योजयत

१. अपूर्वविधि:	अ) उरु प्रथस्व
२. मन्त्र:	आ) यजेत स्वर्गकाम:
३. व्रीहीन् प्रोक्षति	इ) नियमविधि:
४. व्रीहीन् अवहन्ति	ई) अपूर्वविधि:
५. पञ्च पञ्चनखा: भक्ष्या:	उ) परिसंख्याविधि:

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. एकं पृथक् कुरुत

१. एषु एतत् नान्तर्भवति

१)व्रीहीन् प्रोक्षति ३)पञ्च पञ्चनखा: भक्ष्या:

२)व्रीहीन् अवहन्ति ४) उरु प्रथस्व

२. असम्बद्धं पृथक् कुरुत

१) अपूर्वविधि: ३) मन्त्र:

२) नियमविधि: ४) परिसंख्याविधि:

३. एकं निवारयत

१) अपूर्वविधि: ३) उत्पत्तिविधि:

२) नियमविधि: ४) परिसंख्याविधि:

४. असम्बद्धं चिनुत

१) अत्र हि एव आवपन्ति ३)व्रीहीन् प्रोक्षति

२)पञ्च पञ्च नखा: भक्ष्या:

४. रिक्तस्थानं पूरयत

१. पक्षे अप्राप्तस्य प्रापक: विधि: ....।

२. अत्र हि एव ....।

३. श्रुतहानि:, अश्रुतकल्पना, ...।

४. इतरव्यावृत्तिबोधकपदाभावे ....परिसंख्या।

५. इतरव्यावृत्तिबोधकपदसत्वे ....परिसंख्या।

६. रागत: प्राप्तस्य पञ्चातिरिक्तपञ्चनखभक्षणस्य बाधात् ....।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

५. पञ्चाङ्कप्रश्नाः

१. मन्त्राणां किं प्रयोजनम् ?

२. नियमविधिं व्याख्यात ?

३. परिसंख्याद्वैविध्यं निरूपयत ?

४. मन्त्राणां दृष्टार्थत्वे कः नियमः ?

६. दशाङ्कप्रश्नः

१. मन्त्रेणैव मन्त्रार्थः स्वीकार्यः इत्यत्र नियमं स्पष्टयत ?

२. विधित्रैविध्यं निरूप्य, भेदं विशदयत ?

३. परिसंख्यायां दोषत्रयं प्रकटयत ?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अष्टमपाठाध्ययनस्य प्रयोजनानि

१. वयम् एनं पाठं पठित्वा स्मृतेः, आचारस्य च परिचयं सम्पादयामः

पाठे अन्तर्गताः प्रधानविषयाः

स्मृतिः - मन्वादिभिः प्रणीतः, वेदार्थानुभवजन्यः, वेदार्थानुवादकः वाक्यसमूहः

उदाहरणम् → 'मनुस्मृतिः'

आचारः - शिष्टानाम् आचरणम्

उदाहरणम् → 'होलाकोत्सवः'

सन्दिग्धार्थस्य निर्णायकः अर्थवादः एव वाक्यशेषः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

८. अष्टमः पाठः - १. स्मृतिः

स्मृतिः नाम श्रुतेः अर्थम् अवबुध्य विरचितः ग्रन्थः। मन्वादिभिः प्रणीतः, वेदार्थानुभवजन्यः, वेदार्थानुवादकः ग्रन्थविशेषः वा स्मृतिः।

स्मृतिषु वेदार्थानामेव अनुवादः क्रियते। न च एतावता ज्ञातार्थज्ञापिकाः स्मृतयः धर्मे अप्रमाणम् इति भवति, यतः स्मृतिः वेदवत् स्वतन्त्रतया न प्रमाणम्, अपि तु वेदमूलकतया।

वेदेनैव अर्थज्ञानसम्भवे पुनः स्मृतिप्रणयनं व्यर्थमिति चेत्, नानाशाखास्थानां मन्त्राणाम्, विप्रकीर्णानां विषयाणाम् उपसंहारेण च उपयोगात् प्रामाण्यं सम्भवति। वेदविरुद्धाः स्मृतयस्तु न धर्मे प्रमाणम्। [10]

धर्मः ← श्रुतिः ← स्मृतिः

२. आचारः

शिष्टानाम् आचरणमेव आचारपदेन उच्यते। शिष्टानां लक्षणमुक्तम् -

धर्मेण अधिगतो येषां वेदः सपरिबृंहणः।
शिष्टाः तदनुमानज्ञाः श्रुतिप्रत्यक्षहेतवः।।

आचारः होलाकोत्सवादयः। सः च आचारः न स्वतन्त्रतया धर्मे प्रमाणम्। अपि तु श्रुतिमूलकतया।

आचारेण स्मृतेः कल्पनां कृत्वा, स्मृत्या श्रुतेः कल्पनां कृत्वा परम्परया श्रुतिमूलकत्वेनैव आचारः धर्मे प्रमाणम्[11]। उक्तं च -

आचारात्तु स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पनम्।
तेन द्व्यन्तरितं तेषां प्रामाण्यं विप्रकृष्यते।।

वेदमूलकत्वेनैव स्मृत्याचारयोः प्रामाण्यम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कल्पनाप्रकार:

धर्मः ← श्रुतिः ← स्मृतिः ← आचारः

स्मृतिविरुद्धाः मातुलकन्याविवाहाद्याचाराः न धर्मे प्रमाणम्।

अष्टमपाठस्य सारः

मन्वादिभिः प्रणीतः, वेदार्थानुभवजन्यः, वेदार्थानुवादकः वाक्यसमूहः स्मृतिः। स्मृतिः धर्मे वेदमूलकतया प्रमाणम्।

एवं सदाचारः अपि धर्मे वेदमूलकतया एव प्रमाणम्।

अष्टमः पाठः
अभ्यासाः

१. एकाङ्कप्रश्नाः

अ. एकेन पदेन उत्तरत

१. स्मृतेः मूलभूतप्रमाणं किम्?
२. स्मृतिः काम् अनुमाय प्रमाणम्?
३. आचाराणां प्रामाण्यं कुतः विप्रकृष्यते?
४. आचारः कथं धर्मे प्रमाणम्?

आ. एकेन वाक्येन समाधत्त

१. का नाम स्मृतिः?
२. कथं स्मृतेः प्रामाण्यम्?
३. शिष्टाः के?
४. आचारः नाम कः?
५. आचारः कथं प्रमाणम्?
६. श्रुतिविरुद्धस्मृत्याचारयोः प्रामाण्यमुत अप्रामाण्यम्?

विधिसन्निधौ अर्थवादाभावे विधेः एव स्तावकत्वम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. साधूत्तरं योजयत

१. स्मृतिः — अ) श्रुतिमूलकं प्रमाणम्

२. आचारः — आ) निरपेक्षं प्रमाणम्

३. वेदः — इ) स्मृतिमूलकं प्रमाणम्

३. एकं पृथक् कुरुत

१. एषु एतत् नान्तर्भवति

१) धर्मः २) स्मृतिः ३) श्रुतिः ४) आचारः

२. असम्बद्धं पृथक् कुरुत

१) आचारः २) स्मृतिः ३) श्रुतिः

४. रिक्तस्थानं पूरयत

१. आचारात्तु स्मृतिं ज्ञात्वा ....।

२. श्रुतिविरुद्धाः स्मृतयः धर्मे ....।

३. स्मृतिविरुद्धाः आचाराः धर्मे ....।

४. मन्वादिभिः प्रणीतः, वेदार्थानुवादकः, वाक्यसमूहः.........।

५. पञ्चाङ्कप्रश्नाः

१. स्मृतीनां कथं धर्मे प्रामाण्यम्? २. आचारस्य कथं धर्मे प्रामाण्यम्?

६. दशाङ्कप्रश्नः

१. स्मृत्याचारयोः प्रामाण्यं प्रतिपाद्य, श्रुत्या विरोधे किं कार्यमिति स्पष्टयत?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नवमपाठाध्ययनस्य प्रयोजनानि

१. वयम् एनं पाठं पठित्वा नामधेयस्य परिचयं प्राप्नुमः।
२. नामधेये निमित्तचतुष्टयम् अवगच्छामः।

पाठे अन्तर्गताः प्रधानविषयाः

नामधेयम् - विधेयस्य विषयस्य परिच्छेदकं पदम्

उदाहरणम् → 'उद्भित्'

निमित्तानि

१. मत्वर्थलक्षणाभयम्
२. वाक्यभेदभयम्
३. तत्प्रख्यशास्त्रम्
४. तद्व्यपदेशः

नामधेयस्य इतरस्मात् व्यावर्तकत्वेन प्रामाण्यम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

९. नवमः पाठः

१. नामधेयम्

नामधेयम् इति धर्मे षष्ठं प्रमाणम्। नामधेयं नाम किम् इत्युक्ते, विधेयस्य विषयस्य परिच्छेदकं पदं नामधेयम्। परिच्छेदः नाम इतरव्यावृत्तिः, वैजात्याभिधानं वा। यथा 'उद्भिदा यजेत पशुकामः' इत्यत्र उद्भित् शब्दः यागस्य नामधेयम्[१२]। 'उद्भित्' इति पदं 'यजेत' इति विधिना विहितस्य यागादिरूपस्य विषयस्य वैजात्यं कथयति। इत्थं नामधेयानां विधेयार्थस्य परिच्छेदकतया प्रयोजनवत्त्वम्।

इदञ्च वाक्यं यागस्य अप्राप्तत्वात् यागविधायकम्। विधिना विधित्व-रक्षणाय यागसामान्यं विधातुं न शक्यते। अतः यागविशेषः एव विधेयः। तर्हि कः सः यागविशेषः विधीयते इत्यपेक्षायाम् 'उद्भित्' इति शब्दस्य विद्यमानत्वात् 'उद्भित्'-नामकः यागः विधीयते इति ज्ञायते। 'उद्भिन्नामकेन यागेन पशुं भावयेत्' इति अस्य वाक्यस्य अर्थः।



विधिवाक्यस्य एकदेशः नामधेयम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. नामधेयञ्च निमित्तचतुष्टयात् भवति

१. मत्वर्थलक्षणाभयात् नामधेयं भवति। **'उद्भिदा यजेत पशुकामः'** इत्यत्र।

२. वाक्यभेदभयात् नामधेयं भवति। **'चित्रया यजेत पशुकामः'** इत्यत्र।

३. तत्प्रख्यशास्त्रात् नामधेयं भवति। **'अग्निहोत्रं जुहोति'** इत्यत्र।

४. तद्व्यपदेशात् नामधेयं भवति। **'श्येनेन अभिचरन् यजेत'** इत्यत्र।



१. मत्वर्थलक्षणाभयम्

'उद्भिदा यजेत पशुकामः' इत्यत्र 'उद्भित्' इति शब्दस्य अर्थः खनित्ररूपं द्रव्यम् इति स्वीक्रियते चेत् पशुफलोद्देशेन खनितृविशिष्टः यागः विधेयः। विशिष्टविधाने च मत्वर्थलक्षणा[13] अपेक्षिता। सा मत्वर्थलक्षणा दोषाय भवति।

यदि 'उद्भित्' इति शब्दः यागस्य नाम भवति तदा उद्भिन्नामकः यागः फलोद्देशेन विधीयते। तेन न मत्वर्थलक्षणा। उद्भिद् इति नाम, यागः नामी। इत्थम् उद्भिदः नामधेयत्वपक्षे मत्वर्थलक्षणास्वीकारप्रयुक्तः दोषः न भवति।

लक्षणां विना यत्र वाक्यार्थः सम्भवति तत्र लक्षाणास्वीकारः अयुक्तः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मत्वर्थलक्षणाभयम्

'उद्भिदा यजेत पशुकामः'

उद्भित् = खनितृरूपं द्रव्यम् - मत्वर्थलक्षणा
उद्भिद्वता यागेन पशुं भावयेत्

उद्भित् = यागनाम - न मत्वर्थलक्षणा
उद्भिन्नामकेन यागेन पशुं भावयेत्

२. वाक्यभेदभयम्

वाक्यस्य भेदः - आवृत्तिः, वाक्यभेदः। 'चित्रया यजेत पशुकामः' इत्यनेन विधिना चित्रत्वस्य स्त्रीत्वस्य च विधाने वाक्यभेदः भवति। यतः यागः 'दधि, मधु, घृतम्, पयो, धानाः, उदकम्, तण्डुलाः, तत्संसृष्टं प्राजापत्यम्' इति वाक्येन प्राप्तः। चित्रत्वस्त्रीत्वे इति गुणाभ्यां साकं प्राप्तस्य यागस्य सम्बन्धे स्वीक्रियमाणे विध्यावृत्तिरूपः वाक्यभेदः[१४] भवति।

अतः चित्राशब्दः यागस्य नामधेयम् इति स्वीकार्यम्। तेन च 'चित्रानामकेन यागेन पशुं भावयेत्' इति चित्रायजिपदयोः सामानाधिकरण्येन अन्वयः। दध्याद्यनेकद्रव्येण साध्यते इति अस्य यागस्य नाम 'चित्रा' इति सङ्गच्छते।

वाक्यभेदभयम्
'चित्रया यजेत पशुकामः'

चित्रा = चित्रत्वस्त्रीत्वरूपौ गुणौ - वाक्यभेदः
चित्रत्वेन यागं भावयेत्, स्त्रीत्वेन यागं भावयेत्

चित्रा = यागनाम - न वाक्यभेदः
चित्रानामकेन यागेन पशुं भावयेत्

३. तत्प्रख्यशास्त्रम्

विधित्सितस्य गुणस्य प्रापकं प्रमाणान्तरं तत्प्रख्यशास्त्रम्। तस्य प्रख्यापकं शास्त्रम्। तस्य - गुणस्य, प्रख्यापकं - प्रापकं - बोधकम्,

उद्देश्यस्य विधेयस्य वा अनेकत्वे वाक्यभेदः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शास्त्रं - अन्यत् शास्त्रम्, अन्यत् प्रमाणं वा इत्यर्थः। यथा 'अग्निहोत्रं जुहोति' इति।

तत्प्रख्यशास्त्रम्	अग्निरूपगुणपक्षः	गुणप्रापकं शास्त्रम्
'अग्निहोत्रं जुहोति'	१. अग्निदेवता २. अग्निरूपः आधारः	१. यदग्नये च .. २. अग्निः ज्योतिः १. आहवनीये जुहोति

अग्निहोत्रनामकेन होमेन इष्टं भावयेत्

अग्निहोत्रपदं यदि गुणं बोधयति तर्हि तत्र प्रकारद्वयेन गुणबोधः कर्तुं शक्यते। यथा एकं तु होमाधारत्वेन अग्नेः विधानम्, अपरं तु अग्निरूपदेवतायाः विधानम् इति।

विधिना विधातुम् इष्टः गुणः अग्निदेवतारूपः गुणः। 'अग्नये होत्रं - होमः' इति चतुर्थीतत्पुरुषसमासम् आश्रित्य 'अग्निहोत्रम्' इति पदस्य व्युत्पत्तिं सम्पाद्य अग्निरूपदेवतायाः विधानं कर्तुं शक्यते। परं तादृशस्य गुणस्य प्रापकं शास्त्रान्तरम् 'अग्निः अग्निः ज्योतिः...', 'यदग्नये च प्रजापतये च सायं जुहोति'[१५] इति विद्यते। तस्मात् 'अग्निहोत्रं जुहोति' इत्यत्र अग्निहोत्रपदं नामधेयं भवति।

अनेन विधिना 'अग्नौ होत्रम् अग्निहोत्रम्' इति सप्तमीतत्पुरुषसमासम् आश्रित्य सकलहोमाधारत्वेन अग्निरूपस्य गुणस्य विधानं कर्तुं शक्येत। परं 'यदाहवनीये जुहोति' इत्यनेन विधिना होमाधारत्वेन आहवनीयरूपः अग्निः प्राप्तः। तस्मात् पुनः होमाधारत्वेन अग्नेः विधानं व्यर्थम्।

विधित्सितगुणप्रापकं शास्त्रं तत्प्रख्यशास्त्रम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

देवतायाः प्राप्तिः

तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः।
देवतायाः विधिः तत्र दुर्बलं तु परं परम्।।



४. तद्व्यपदेशः

तेन व्यपदेशः। तेन विधित्सितेन गुणेन श्येनेन, व्यपदेशः- भिन्नार्थकतया (उपमानत्वेन) कथनम्। यथा 'श्येनेन अभिचरन् यजेत' इत्यत्र यदि श्येनरूपः पक्षिविशेषः विधेयः स्यात्, तर्हि 'यथा वै श्येनो निपत्य आदत्ते एवम् अयं भ्रातृव्यं निपत्य आदत्ते' इत्यनेन अर्थवादेन श्येनस्यैव स्तुतिः कार्या। परम् अर्थवादेन श्येनोपमानेन अर्थान्तरस्यैव स्तुतिः क्रियते। उपमानत्वोपमेयत्वयोः भिन्ननिष्ठत्वात्, श्येनोपमानेन श्येनस्यैव तुलना कर्तुं न शक्यते। यदि 'श्येनेन अभिचरन् यजेत' इत्यनेन श्येनसञ्ज्ञकः यागः विधीयते तदा अर्थवादेन श्येनोपमानेन यागस्यैव स्तुतिः कर्तुं शक्यते। अत्र 'यद्विधेयं तस्य स्तुतिः' इति न्यायः। अतः श्येनशब्दः कर्मनामधेयम्।

उपमानेन श्येनेन श्येनातिरिक्तस्य यागस्यैव स्तुतिः कार्या

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तद्व्यपदेश:

'श्येनेन अभिचरन् यजेत'

श्येन: = श्येनरूप: गुण: - उपमानानुपपत्ति:

श्येनपक्षिणा साकम् उपमानोपमेयभाव: न सम्भवति

श्येन: = यागनाम - उपमानोपमेयभाव: उपपद्यते

श्येननामकेन यागेन अभिचारं भावयेत्

नवमपाठस्य सार:

विधिना विधीयमानस्य कर्मण: नाम एव नामधेयम्। नामधेयं निमित्तचतुष्टयात् मन्तव्यम्। मत्वर्थलक्षणाभयात्, **'उद्भिदा यजेत** पशुकाम:' इत्यत्र उद्भित्पदम्, वाक्यभेदभयात् '**चित्रया** यजेत पशुकाम:' इत्यत्र चित्रापदम्, तत्प्रख्यशास्त्रात् '**अग्निहोत्रं** जुहोति' इत्यत्र अग्निहोत्रपदम्, तद्व्यपदेशात् '**श्येनेन** अभिचरन् यजेत' इत्यत्र श्येनपदं नामधेयं भवति।

नवम: पाठ:

अभ्यासा:

१. एकाङ्कप्रश्ना:

अ. एकेन पदेन उत्तरत

१. पूर्वपक्षे श्येनपदार्थ: क:?

२. पूर्वपक्षे उद्भित् नाम किम्?

३. सिद्धान्ते उद्भित् नाम किम्?

४. नामधेयस्य उदाहरणं किम्?

५. श्नेनन अभिचरन् यजेत इत्यत्र नामधेयं किम्?

यद्विधेयं तस्य स्तुति: इति न्याय:

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आ. एकेन वाक्येन समाधत्त

१. नामधेयं नाम किम्?

२.तत्प्रख्यशास्त्रम् इत्यत्र तत्पदेन कस्य ग्रहणम्?

३. तत्प्रख्यशास्त्रम् इत्यस्य का व्युत्पत्तिः?

४. चित्रा इत्यनेन कयोः गुणयोः निवेशः?

५. होमाधारत्वेन अग्निः केन विहितः?

६. अग्निदेवताप्रापकं शास्त्रान्तरं किम्?

७. उद्भिदा यजेत पशुकामः इत्यस्य वाक्यस्य कः अर्थः?

८. नामधेये निमित्तानि कानि?

९. मत्वर्थलक्षणाभयस्य किमुदाहरणम्?

१०. वाक्यभेदस्य किमुदाहरणम्?

११. तत्प्रख्यशास्त्रस्य किमुदाहरणम्?

१२. तद्व्यपदेशस्य किमुदाहरणम्?

१३. उद्भिदा यजेत इत्यत्र उद्भिदः नामधेयत्वे कः दोषः न भवति?

१४. चित्रया यजेत इत्यत्र गुणविधिपक्षे कः दोषः?

१५. अग्निहोत्रपदस्य नामधेयत्वे कः दोषः न भवति?

१६. पूर्वपक्षरीत्या श्येनपदस्य अर्थः कः?

२. साधूत्तरं योजयत

१. वाक्यभेदः	अ) श्येनेन अभिचरन् यजेत
२. तत्प्रख्यशास्त्रम्	आ) अग्निहोत्रं जुहोति
३. मत्वर्थलक्षणाभयम्	इ) चित्रया यजेत पशुकामः
४. तद्व्यपदेशः	ई) उद्भिदा यजेत पशुकामः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. एकं पृथक् कुरुत

१. एषु एतत् नान्तर्भवति

१. वाक्यभेदः	३. मत्वर्थलक्षणाभयम्
२. तत्प्रख्यशास्त्रम्	४. एकवाक्यता

२. असम्बद्धं पृथक् कुरुत

१. वाक्यभेदः	३. अग्निहोत्रं जुहोति
२. तत्प्रख्यशास्त्रम्	४. तद्व्यपदेशः

३. एकं निवारयत

१) अग्निहोत्रम्	३) श्येनः
२) चित्रा	४) जुहोति

४. असम्बद्धं चिनुत

१) यदग्नये च प्रजापतये च

२) आहवनीये जुहोति

३) अग्निहोत्रं जुहोति

४. रिक्तस्थानं पूरयत

१. यथा वै श्येनो निपत्य.........।

२. दधि मधु.....................।

३. तद्धितेन चतुर्थ्या वा ....।

४. श्येनेन ....।

५. उद्भिदा यजेत................।

६. यद्विधेयं तस्य ....।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

५. पञ्चाङ्कप्रश्ना:

१. नामधेयं स्पष्टयत ?

२. नामधेये निमित्तानि कानि, उदाहरत ?

३. मत्वर्थलक्षणाभयस्य किमुदाहरणम्, समन्वयत ?

४. वाक्यभेदस्य किमुदाहरणम्, समन्वयत ?

५. तत्प्रख्यशास्त्रस्य किमुदाहरणम्, समन्वयत ?

६. तद्व्यपदेशस्य किमुदाहरणम्, समन्वयत ?

६. दशाङ्कप्रश्न:

१. नामधेयस्य प्रयोजनं प्रतिपाद्य निमित्तानि व्याख्यात ?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दशमपाठाध्ययनस्य प्रयोजनानि

१. वयम् एनं पाठं पठित्वा वाक्यशेषस्य सामर्थ्यस्य च परिचयं प्राप्नुमः।

पाठे अन्तर्गताः प्रधानविषयाः

वाक्यशेषः - सन्दिग्धार्थस्य निर्णायकः अर्थवादः

उदाहरणम् → 'तेजो वै घृतम्'

सामर्थ्यम्

१. स्रुवः	घृतम्
२. स्वधितिः	मांसम्
३. हस्तः	पुरोडाशः

सन्दिग्धार्थस्य निर्णायकत्वात् वाक्यशेषः धर्मे प्रमाणम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१०. दशमः पाठः

१. वाक्यशेषः

वाक्यशेषः इति धर्मे सप्तमं प्रमाणम्। 'अक्ताः शर्कराः उपदधाति' इति विधिः श्रूयते। तत्सन्निधौ अर्थवादः श्रूयते 'तेजो वै घृतम्' इति। अस्य अर्थवादस्य सन्दिग्धार्थस्य निर्णायकत्वेनापि प्रामाण्यं सम्भवति। तथा हि विधिना अञ्जनसंस्कारेण संस्कृतानां शर्कराणाम् स्थापनं विहितम्। परम् अञ्जनसाधनद्रव्यस्य निर्देशः विधौ न कृतः। अञ्जनसाधनद्रव्यं विना शर्कराणाम् अञ्जनं न सम्भवति। अतः अञ्जनं कर्तुं द्रव्यापेक्षा वर्तते। द्रवद्रव्यं विना अञ्जनक्रियानुपपत्या विधिना द्रव्यम् आक्षेपणीयम्।

अर्थवादेन घृतस्य स्तुतिः कृता। 'यद्विधेयं तस्य स्तुतिः' इति न्यायेन घृतस्य स्तुतेः कृतत्वात् स्तुत्यन्यथानुपपत्या घृतं विधातव्यम्। एवम् अनुपपत्तिद्वयेन घृतेनैव अञ्जनमिति निर्णयः क्रियते।

एवं च यः अर्थवादः सन्दिग्धार्थस्य निर्णायकः, सः वाक्यशेषः इति व्यवहारः क्रियते।

वाक्यशेषः



विधिनिषेधवाक्ययोः शेषः वाक्यशेषः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. सामर्थ्यम्

धर्मे अष्टमं प्रमाणम्। यथा 'स्रुवेण अवद्यति', 'स्वधितिना अवद्यति', 'हस्तेन अवद्यति' इति वाक्यानि अवदानविधायकानि। अवदेयद्रव्याणि च मांसपुरोडाशघृतादीनि। यद्यपि सामान्यतया अवदानस्य साधनानि श्रुतानि, न तु अस्य द्रव्यस्य एतत् साधनमिति विशेषाकारेण, तथापि अवदानसाधनस्य सामर्थ्यानुसारेण स्रुवेण घृतस्यैव, हस्तेन पुरोडाशस्यैव, स्वधितिना मांसस्यैव अवदानं कार्यमिति निर्णीयते।



एवम् अष्टौ धर्मबोधकानि प्रमाणानि प्रथमाध्याये विचारितानि। एतत्प्रमाणप्रतिपाद्यः धर्मः द्वितीयाध्यायप्रभृति विचार्यते।

❀ ❀ ❀

सामर्थ्यम् - पदार्थगता शक्तिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दशमपाठस्य सारः

'अक्ताः शर्कराः उपदधाति' इति विधिसन्निधौ श्रूयमाणः 'तेजो वै घृतम्' इति अर्थवादः एव वाक्यशेषः। अस्य अर्थवादस्य सन्दिग्धस्य अर्थस्य निर्णायकत्वेनापि प्रामाण्यं सम्भवति। अत्र सन्दिग्धः विषयः शर्कराणाम् अञ्जनं केन द्रव्येण कार्यमिति। घृतेनैव अञ्जनमिति घृतस्तावकात् वाक्यशेषात् निर्णीयते।

सामर्थ्यं धर्मे प्रमाणम्। सामर्थ्यं नाम पदार्थगता शक्तिः। यथा 'स्रुवेण अवद्यति', 'स्वधितिना अवद्यति', 'हस्तेन अवद्यति' इत्यत्र अवदानसाधनस्य सामर्थ्यानुसारेण स्रुवेण घृतस्यैव, हस्तेन पुरोडाशस्यैव, स्वधितिना मांसस्यैव अवदानं कार्यमिति निर्णीयते।

दशमः पाठः
अभ्यासाः

१. एकाङ्कप्रश्नाः

अ. एकेन पदेन उत्तरत

१. धर्मे कति प्रमाणानि सन्ति?

२. शर्कराः नाम काः?

३. शर्कराणाम् अञ्जनं केन कार्यम्?

४. स्रुवेण अवदानं कस्य द्रव्यस्य कार्यम्?

५. स्वधितिना अवदानं कस्य द्रव्यस्य कार्यम्?

६. हस्तेन अवदानं कस्य द्रव्यस्य कार्यम्?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आ. एकेन वाक्येन समाधत्त

१. वाक्यशेषः नाम कः?

२. वाक्यशेषोदाहरणं किम्?

३. सामर्थ्यं नाम किम्?

४. सामर्थ्योदाहरणं किम्?

५. अवदेयद्रव्याणि कानि?

६. घृतस्तावकं वाक्यं किम्?

७. धर्मबोधकानि प्रमाणानि कानि?

२. साधूत्तरं योजयत

१. स्रुवः	अ) घृतम्
२. हस्तः	आ) घृतम्
३. स्वधितिः	इ) मांसम्
४. अञ्जनसाधनम्	इ) पुरोडाशः

३. एकं पृथक् कुरुत

१. एषु एतत् नान्तर्भवति

१) स्रुवः २) हस्तः ३) स्वधितिः ४) घृतम्

४. रिक्तस्थानं पूरयत

१. ....अवद्यति। (मांसम्)

२. ....अवद्यति। (घृतम्)

३. ....अवद्यति। (पुरोडाशः)

वेदः धर्मं प्रति स्वतन्त्रम् अन्यनिरपेक्षं प्रमाणम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. अक्ता: शर्करा: ....।

५. तेजो वै ....।

५. पञ्चाङ्कप्रश्ना:

१. वाक्यशेषं निरूपयत।

२. सामर्थ्यं स्पष्टयत।

६. दशाङ्कप्रश्न:

१. वाक्यशेषार्थवादयो: भेदं प्रकटयत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१. तृतीयः परिच्छेदः

प्रथमपाठाध्ययनस्य प्रयोजनानि

१. वयम् एनं पाठं पठित्वा भावनायाः स्वरूपस्य परिचयं प्राप्नुमः। २. भावनायां करणत्वेन अन्वयः कस्य इति जानीमः। ३. शाब्दी, आर्थी इति भावानायाः द्वैविध्यम् अवगच्छामः।

पाठे अन्तर्गताः प्रधानविषयाः

भावना - यजेत' इत्यादौ 'त' इति प्रत्यये विद्यमानयोः आख्यातत्वलिङ्त्वविशिष्टयोः अर्थः

सोमेन यजेत इत्यादौ भावनायां धात्वर्थस्य यागस्य करणत्वेन अन्वयः



वाक्यार्थे भावना मुख्यविशेष्या भवति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. तृतीयः परिच्छेदः- द्वितीयाध्यायस्य विषयः

कर्मभेदः अध्यायार्थः। कर्मभेदपदेन भावनाभेदः विवक्षितः।

१. प्रथमः पाठः - १. भावनाकरणत्वम्

'सोमेन यजेत' इत्यादौ 'त' इति प्रत्ययेन बोधितायां भावनायां करणत्वेन अन्वयः कस्य इति विचारे 'प्रधानान्वयस्य अभ्यर्हितत्वात्' सर्वेषां पदार्थानां भावनायां करणत्वम् इति पूर्वपक्षः। अनेकादृष्ट-कल्पनाप्रसङ्गात् एकस्यैव पदार्थस्य भावनाकरणत्वमिति सिद्धान्तः कृतः।

यदि एकः एव पदार्थः भावनायां करणम्, तर्हि धात्वर्थः यागदिः भावनाकरणम् उत उपपदार्थः सोमादिः इति संशये, सोमस्य करणत्वं तु साक्षात् प्रत्यक्षया तृतीयाश्रुत्या अवगम्यते, धात्वर्थस्य तु करणत्वं कल्प्यम्। 'सिद्धं साध्याय उपदिश्यते' इति न्यायानुसारेण सिद्धस्य सोमस्य करणत्वं युक्तम्। यागस्तु साध्यः। अतः तस्य करणत्वम् असिद्धत्वादेव न युक्तम्। अतः सोमः एव करणमिति प्राप्ते, कारकश्रुत्यपेक्षया समानपदश्रुतेः बलीयस्त्वात्, समानपदश्रुत्या धात्वर्थः यागः एव करणम् इति सिद्धान्तः।

भावनाबोधकस्य पदस्य अभावात् कुतः भावनाकरणत्वविचारः? यतः 'त' इति प्रत्ययार्थः 'कर्ता', न तु 'भावना' इति वैयाकरणाः ब्रुवते।



समानपदश्रुत्या यागः करणम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. भावनाबोधकपदविवरणम्

धर्मरूपः यागादिः 'यजेत स्वर्गकामः' इत्यादिवेदवाक्येन स्वर्गादिरूपफलाय पुरुषं प्रति विधीयते। 'यजेत' इत्यत्र 'यज्' इति धातुः, 'त' इति प्रत्ययः इति अंशद्वयं विद्यते। 'त' इति प्रत्ययेऽपि आख्यातत्वं लिङ्त्वम् इति धर्मद्वयविशिष्टौ आख्यातांशलिङंशौ स्तः। द्वयोः अंशयोः भावना एव अर्थः।



३. भावना

आख्यातम्, लिङ् च इति द्वाभ्याम् अंशाभ्यां 'भावना' उच्यते।

भावना नाम उत्पद्यमानस्य स्वर्गादिफलस्य उत्पत्त्यनुकूलः उत्पादकस्य पुरुषस्य व्यापारविशेषः[१६]।

सा च भावना शब्दभावना, अर्थभावना इति द्विविधा।

फलजनकः पुरुषस्य व्यापारविशेषः भावना

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



४. शाब्दी

शिष्यादिपुरुषस्य प्रवृत्तिजनकः, आचार्यादिपुरुषस्य व्यापारविशेषः शाब्दी भावना[१७]। प्रेरणा, प्रवर्तना, विधिः इति शाब्द्याः पर्यायपदानि। 'लिङ्' इति अंशेन शब्दभावना अभिधीयते। 'गच्छेत्' इत्यादिपदस्य श्रवणे 'अयम् आचार्यः मां गमने प्रवर्तयति', अथवा 'मयि प्रवृत्तेः उत्पादकव्यापारवान् अयम् आचार्यः' इति नियमेन ज्ञायते।

पुरुषप्रवृत्तिजनिका भावयितुः व्यापारविशेषरूपा शब्दभावना लौकिक-वाक्ये 'गामानय' इत्यादिरूपा। सा आचार्यादिप्रवर्तकपुरुषे विद्यमानः इच्छारूपः अभिप्रायविशेषः। 'यजेत स्वर्गकामः' इत्यादिवैदिकवाक्ये पुरुषाभिप्रायाभावात् अयं व्यापारविशेषः लिङादिशब्दे विद्यमानः धर्मविशेषः एव। शब्दे निष्ठत्वादेव इयं भावना शब्दभावना इति कथ्यते।

शब्दे विद्यमाना भावना शब्दभावना

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



५. शब्दभावनायाः अंशत्रयम्

सा च शब्दभावना 'साध्यम्', 'साधनम्', 'इतिकर्तव्यता' इति अंशत्रयम् आकाङ्क्षति। अंशत्रयस्यैव 'किम्', 'केन', 'कथम्' इति आकारः। शब्दभावनायाः साध्याकाङ्क्षायां साध्यम्, साधनम्, इतिकर्तव्यता इति अंशत्रयवती अर्थभावना साध्यत्वेन अन्वेति। तत्र च प्रमाणं समानाभिधानश्रुतिः। अर्थात् एकप्रत्ययगम्यत्वम्। 'यजति' इत्यादिषु विद्यमानेन एकेन 'त' इति प्रत्ययेन शाब्दी, आर्थी इति भावनाद्वयम् अवगम्यते। अर्थात् 'त' इति प्रत्यये विद्यमानाभ्याम् आख्यातम्, लिङिति द्वाभ्याम् अंशाभ्यां शाब्दी, आर्थी इति द्वे भावने अभिधीयेते। एवम् एकप्रत्ययाभिधेयत्वमेव शब्दभावनायाम् अर्थभावनायाः अन्वये प्रमाणम्।

शब्दभावनायाः करणाकाङ्क्षायां लिङ्लेट्लोट्तव्यप्रत्ययानां ज्ञानं साधनत्वेन सम्बध्यते।

भावना सर्वत्र आकांक्षात्रयोपेता

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इतिकर्तव्यताकाङ्क्षायाम् अर्थवादेन ज्ञाप्य: 'प्रशस्त:' इत्याकारकं प्राशस्त्यज्ञानम् इतिकर्तव्यतात्वेन सम्बध्यते।



६. अर्थभावना

फले इच्छावशात् उत्पन्न: क्रियाविषयव्यापार: अर्थभावना[१८]। स्वर्गादिरूपे फले रागादिना उत्पन्न: यागादिक्रियाविषयक: य: पुरुषस्य व्यापारविशेष: स: अर्थभावना। प्रवृत्ति:, यत्न:, प्रयत्न:, कृति: इत्येवं पर्यायपदानि।

७. अर्थभावनाया: अंशत्रयम्

सा अर्थभावना 'त' इति प्रत्यये विद्यमानेन आख्यातांशेन उच्यते। यतो हि आख्यातस्य व्यापार: अर्थ:। सा च अर्थभावना भावनासामान्यादेव 'साध्यम्', 'साधनम्', 'इतिकर्तव्यता' इति अंशत्रयम् इच्छति। अस्यैव अंशत्रयस्य 'किम्', 'केन', 'कथम्' इति आकार:। अर्थभावनाया: साध्याकाङ्क्षायां स्वर्गादिरूपं फलं साध्यत्वेन अन्वेति। साध्यम् - भाव्यम्, फलम्।

भाव्यम्, करणम्, इतिकर्तव्यता इति भावनायाम् अंशत्रयम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अर्थभावनाया: साधनाकाङ्क्षायां धात्वर्थयागादि: साधनत्वेनान्वेति। इतिकर्तव्यताकाङ्क्षायां प्रयाजाद्यङ्गसमूह: इतिकर्तव्यतात्वेन अन्वेति।



सा च भावना मुख्यविशेष्यभूता। प्रकृत्यर्थप्रत्ययार्थयो: मध्ये प्रत्ययार्थ: प्रधान: भवति। आख्यातार्थेषु बहुषु सत्सु, भाव: नाम भावना प्रधानम्। 'देवदत्त: ओदनं पचति' इत्यत्र 'देवदत्तकर्तृका ओदनकर्मिका पाकानुकूला भावना' इति शाब्दबोध:।

देवदत्त:	ओदनं	पचति
देवदत्त + सु	ओदन + अम्	पच् + त
कर्ता	कर्म	क्रिया - कृति:
देवदत्तकर्तृका	ओदनकर्मिका	पाकानुकूला भावना

प्रथमपाठस्य सार:

'सोमेन यजेत' इत्यादौ 'त' इति प्रत्ययेन भावना बोध्यते। तस्यां भावनायाम् उपपदार्थस्य सोमस्य एवं धात्वर्थस्य यागस्यापि

कर्मजन्य: फलजनक: अवान्तरव्यापार: अपूर्वम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

करणत्वेन अन्वयः भवति न वा इति संशयं कृत्वा एकेन पदेन बोधितत्वात् धात्वर्थस्यैव भावनायां करणत्वेन अन्वयः इति सिद्धान्तः क्रियते।

सा च भावना यजेत इत्यादिपदेषु विद्यमानेन 'त' इति प्रत्ययेन बोध्यते। भावना नाम फलोत्पादकः पुरुषस्य व्यापारविशेषः। सा भावना शाब्दी, आर्थी इति द्विविधा विद्यते। 'त' इति प्रत्यये आख्यातांशः, लिङंशः इति अंशद्वयं वर्तते। तयोः आख्यातांशेन अर्थभावना अभिधीयते। लिङंशेन शब्दभावना अभिधीयते।

परपुरुषस्य प्रवृत्तिजनकः प्रवर्तकपुरुषस्य व्यापारविशेषः शब्दभावना। शब्दभावनायाः साध्यं प्रवृत्तिः नाम अर्थभावना अस्ति। साधनं लिङादिज्ञानं भवति। इतिकर्तव्यता प्राशस्त्यज्ञानं भवति।

फलं प्राप्तुम् इच्छावशात् क्रियमाणक्रियायाः उत्पादकः व्यापारविशेषः अर्थभावना भवति। तस्यां भावनायां साध्यं स्वर्गादिफलं भवति। साधनं धात्वर्थः भवति। इतिकर्तव्यता प्रयाजादिकम् अङ्गं भवति।

प्रथमः पाठः
अभ्यासाः

१. एकाङ्कप्रश्नाः

अ. एकेन पदेन उत्तरत

१. द्वितीयाध्यायविषयः कः?

२. यजेतेत्यत्र कति अंशाः सन्ति?

३. तिबादिप्रत्यये कति अंशाः सन्ति?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. दशसु लकारेषु विद्यमानः अंशः कः ?

५. भावना कतिधा विभक्ता ?

६. शाब्दीभावना केन उच्यते ?

७. शाब्दीभावनायाः साध्याकाङ्क्षायां किमन्वेति ?

८. शाब्दीभावनायाः साधनाकाङ्क्षायां किमन्वेति ?

९. शाब्दीभावनायाः इतिकर्तव्यताकाङ्क्षायां किमन्वेति ?

१०. आर्थीभावनायाः साध्याकाङ्क्षायां किमन्वेति ?

११. आर्थीभावनायाः साधनाकाङ्क्षायां किमन्वेति ?

१२. आर्थीभावनायाः इतिकर्तव्यताकाङ्क्षायां किमन्वेति ?

१३. लोके करणत्वं नाम किम् ?

१४. वैयाकरणमतरीत्या त इति प्रत्ययस्य अर्थः कः ?

१५. वाक्यार्थे कस्याः प्राधान्यम् ?

आ. एकेन वाक्येन समाधत्त

१. भावना केन उच्यते ?

२. शाब्दीभावनायाः साध्याकाङ्क्षायां कुतः आर्थीभावनान्वेति ?

३. शब्दभावनायाः पर्यायपदानि कानि ?

४. आर्थीभावनायाः लक्षणं किम् ?

५. अर्थभावनायाः पर्यायपदानि कानि ?

६. का नाम भावना ?

७. देवदत्तः ओदनं पचति इत्यत्र वाक्यार्थः कः ?

८. शाब्दीभावनायाः लक्षणं किम् ?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

९. सोमस्य करणत्वे किं मानम्?

१०. भावनाया: अंशत्रयं किम्?

११. उपपदार्थस्यापि करणत्वेनान्वये क: न्याय: उक्त:?

२. साधूत्तरं योजयत

१. यागस्य करणत्वे	अ) कारकश्रुति:
२. लिङ्	आ) शब्दभावना
३. आख्यातम्	इ) अर्थभावना
४. सोमस्य करणत्वे	ई) एकपदश्रुति:

३. एकं पृथक् कुरुत

१. एषु एतत् नान्तर्भवति

१) साध्यं २) साधनं ३) कर्ता ४) इतिकर्तव्यता

२. असम्बद्धं पृथक् कुरुत

१) किं २) केन ३) किमर्थं ४) कथं

३. एकं निवारयत

१) प्रवृत्ति: २) यत्न: ३) आर्थी ४) प्रेरणा

४. असम्बद्धं चिनुत

१) विधि: २) कृति: ३) शाब्दी ४) प्रवर्तना

४. रिक्तस्थानं पूरयत

१. सिद्धं........................उपदिश्यते।

२. फलोत्पत्त्यनुकूल: उत्पादकव्यापार:.........।

३. सोमेन ....।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पञ्चाङ्कप्रश्नाः

१. भावनायां किं करणम्?

२. यजेत इति पदं विवृणुत?

३. शाब्द्याः अंशत्रयं किम्?

४. आर्थ्याः अंशत्रयं किम्?

५. भावनां निरूप्य तद्भेदं स्पष्टयत?

६. दशाङ्कप्रश्नः

१. आर्थीं भावनां व्याख्यात?

२. शाब्दीं निरूपयत?

३. "प्रत्यययार्थो भावना", स्पष्टयत?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वितीयपाठाध्ययनस्य प्रयोजनानि

१. वयम् एनं पाठं पठित्वा अपूर्वस्य परिचयं प्राप्नुमः।
२. अपूर्वस्य विभागज्ञानं सम्पादयामः।

पाठे अन्तर्गताः प्रधानविषयाः

अपूर्वम् - कर्मजन्यः फलजनकः अवान्तरव्यापारः



२. द्वितीयः पाठः
१. अपूर्वस्य परिचयः

वेदेन स्वर्गादिफलं यागादिना जन्यते इत्युक्तम्। परं यागादिकं आशुतरविनाशि भवति। स्वर्गस्तु कालान्तरे उत्पद्यते। अतः श्रुतकरणत्वस्य निर्वाहाय यागजन्यं फलजनकं फलोत्पत्तिपर्यन्तम् अवस्थायि अपूर्वं विधिना आक्षिप्यते।

अपूर्वं नाम कर्मजन्यम् अदृष्टम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यागः ⟶ अपूर्वम् ⟶ फलम्

अपूर्वम् - यागजन्यः फलजनकः अवान्तरव्यापारः

करणेन फलोत्पत्तिपर्यन्तं भाव्यम्। करणरूपः यागः वर्तमानकालीनः। फलं च भाविकाले उत्पद्यमानम्। यागस्य आशुतरविनाशित्वात् कालान्तरभाविफलजनकत्वं प्रत्यक्षविरुद्धम्। यागध्वंसस्यापि फलजनकत्वं वक्तुं न शक्यते। यागध्वंसस्य नित्यत्वात्, 'धर्मः क्षरति कीर्तनात्' इति वचनानुसारेण यागध्वंसस्य नाशयत्वं वक्तुं न शक्यते। अतः 'यागजन्यः फलजनकः अपूर्वाख्यः अवान्तरव्यापारः' कश्चित् कल्प्यते। सः च फलबलात् आत्मनिष्ठः इति कल्प्यते।

२. इदं च अपूर्वं चतुर्विधम्।

१.	फलजनकम् अपूर्वम्	-	परमापूर्वम्।
२.	समुदायजन्यम् अपूर्वम्	-	समुदायापूर्वम्।
३.	प्रधानयागजन्यमपूर्वम्	-	उत्पत्त्यपूर्वम्।
४.	अङ्गात् जायमानमपूर्वम्	-	अङ्गापूर्वमिति।



यथा 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यधिकारे आग्नेयादयः त्रयः यागाः पूर्णिमायाम्, पुनः आग्नेयादयः त्रयः यागाः अमावास्यायाम्, आहत्य षड्यागाः विहिताः।

अपूर्वं नाम अदृष्टम्, पुण्यपापविशेषो वा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पौर्णमास्याम् इमे यागाः विहिताः -

१. 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्याञ्च अच्युतो भवति' इत्यनेन आग्नेययागः विहितः।

२. 'उपांशुयाजम् अन्तरा यजति' इति उपांशुयागः 'तावब्रूताम् अग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्' इति वाक्यविहितः।

३. 'ताभ्यामेतम् अग्नीषोमीयम् एकादशकपालं पूर्णमासे प्रायच्छत्' इति अग्नीषोमीयपुरोडाशयागः विहितः।

इमे त्रयः अपि यागाः प्रधानयागाः। तैः प्रत्येकम् उत्पत्त्यपूर्वम् उत्पद्यते। एषां पौर्णमासीकालसम्बन्धं निमित्तीकृत्य समुदायः सिद्ध्यति। तादृशसमुदायेन उत्पद्यमानम् अपूर्वं समुदायापूर्वम्।



एवम् अमावास्यायामपि त्रयः यागाः विहिताः।

१. 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्याञ्चाच्युतो भवति' इत्यनेन आग्नेययागः विहितः। एवं द्वौ सान्नाय्ययागौ विहितौ। यथा -

२. 'ऐन्द्रं दध्यमावास्यायाम्' इति ऐन्द्रदधियागः विहितः।

३. 'ऐन्द्रं पयोऽमावास्यायाम्' इति ऐन्द्रपयोयागः विहितः।

उत्पत्त्यपूर्वसमुदायेन उत्पद्यमानम् अपूर्वं समुदायापूर्वम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अत्रापि पूर्ववदेव त्रीणि उत्पत्त्यपूर्वाणि, एकं समुदायापूर्वं च उत्पद्यते।



दर्शपूर्णमासप्रकरणे 'समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिः यजति, स्वाहाकारं यजति' इति प्रयाजरूपम् अङ्गं विहितम्। एवम् अनूयाजः, आज्यभागः, इडाभक्षणम्, स्विष्टकृत्, प्रोक्षणादीनि च अङ्गानि तत्प्रकरणे पठितानि। तैः प्रत्येकम् अङ्गापूर्वं जन्यते।



समुदायापूर्वद्वयम् एवम् अङ्गापूर्वाणि मिलित्वा फलजनकम् एकं परमापूर्वम् उत्पद्यते। परमापूर्वस्य पलजनकत्वात् फलापूर्वमित्यपि नाम।



यागध्वंसादीनाम् अपूर्वत्वं मीमांसकैः निराकृतम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वितीयपाठस्य सार:

वेदेन यागानुष्ठानेन स्वर्गः भवति इति उक्तं चेदपि फलोत्पत्तिपर्यन्तं यागः न तिष्ठति। अतः अपूर्वम् इति कश्चन पदार्थः अङ्गीकर्तव्यः। अपूर्वं नाम यागजन्यः फलजनकः अवान्तरव्यापारः। अदृष्टम् इति अपरं नम।

अपूर्वं फलापूर्वम्, समुदायापूर्वम्, उत्पत्त्यपूर्वम्, अङ्गापूर्वमिति चतुर्विधं भवति। फलोत्पादकम् अपूर्वं फलापूर्वम्। उत्पत्त्यपूर्वसमुदायेन उत्पद्यमानम् अपूर्वं समुदायापूर्वम्। प्रधानकर्मणा उत्पद्यमानम् अपूर्वम् उत्पत्यपूर्वम्। अङ्गैः उत्पद्यमानम् अपूर्वम् अङ्गापूर्वम्।

अभ्यासा:

१. एकाङ्कप्रश्नाः

अ. एकेन पदेन उत्तरत?

१. अपूर्वस्य अस्तित्वे किं प्रमाणम्?

२. दर्शपूर्णमासयोः कति यागाः सन्ति?

३. अपूर्वं कतिविधम्?

४. कति प्रयाजाः सन्ति?

५. फलजनकम् अपूर्वं किम्?

६. प्रधानयागजन्यम् अपूर्वं किम्?

७. पूर्णिमायां कति यागाः सन्ति?

८. दर्शे कति यागाः सन्ति?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आ. एकेन वाक्येन समाधत्त

१. अपूर्वं नाम किम् ?

२. अपूर्वस्य विभागा: के ?

३. आग्नेययागविधायकं वाक्यं किम्?

४. उपांशुयागविधायकं वाक्यं किम्?

५. अग्नीषोमीयविधायकं वाक्यं किम्?

६. ऐन्द्रपयोयागविधायकं वाक्यं किम्?

७. ऐन्द्रदधियागविधायक: विधि: क:?

८. प्रयाजा: के?

२. साधूत्तरं योजयत

१.दर्शपूर्णमासयाग:	अ) अङ्गापूर्वम्
२.प्रयाज:	आ) समुदायापूर्वम्
३.आग्नेय:	इ) परमापूर्वम्
४.दर्शयाग:	ई) उत्पत्त्यपूर्वम्
५.अग्निहोत्रम्	उ) फलापूर्वम्

३. एकं पृथक् कुरुत

१. एषु एतत् नान्तर्भवति

१) आग्नेययाग: ३) ऐन्द्रं पय:

२) ऐन्द्रं दधि ४) उपांशुयाग:

२. असम्बद्धं पृथक् कुरुत

१) समिधो यजति ३) इडो यजति

२) तनूनपातं यजति ४) सोमेन यजति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. एकं निवारयत

१) प्रयाजः ३) आज्यभागः

२) अनूयाजः ४) आग्नेयः

४. असम्बद्धं चिनुत

१) अङ्गापूर्वम् ३) लघ्वपूर्वम्

२) समुदायापूर्वम् ४) परमापूर्वम्

४. रिक्तस्थानं पूरयत

१. धर्मः क्षरति ....।

२. दर्शपूर्णमासाभ्यां ....।

३. यदाग्नेयोष्टाकपालो.......।

४. उपांशुयाजम्............।

५. ऐन्द्रं पयः................।

५. पञ्चाङ्कप्रश्नाः

१. अपूर्वं किमर्थं कल्पनीयम्?

६. दशाङ्कप्रश्नः

१. अपूर्वस्य चातुर्विध्यं प्रकटयत?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तृतीयपाठाध्ययनस्य प्रयोजनानि

१. वयम् एनं पाठं पठित्वा यजिपदाभावेपि यागस्य कल्पना कुत्र कुत्र भवति इति जानीमः। २. एवं लिङाद्यभावेपि विधायकत्वं कुत्र इति अवगच्छामः। ३. स्तोत्रस्य, शस्त्रस्य, मन्त्रस्य, ब्राह्मणस्य, ऋचः, साम्नः, यजुषाम्, एकवाक्यत्वस्य च स्वरूपं जानीमः।

पाठे अन्तर्गताः प्रधानविषयाः

यजिपदाभावेपि यागस्य कल्पना

'यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्याञ्चाच्युतो भवति'

लिङाद्यभावेपि विधायकत्वं

'यजति, जुहोति, प्रोक्षति'

स्तोत्रलक्षणम्

शस्त्रलक्षणम्

मन्त्रलक्षणम्

ब्राह्मणलक्षणम्

ऋचः लक्षणम्

साम्नः लक्षणम्

यजुषां लक्षणम्

एकवाक्यत्वलक्षणम्

यागे द्रव्यं देवता इति अङ्गद्वयम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. तृतीयः पाठः - १. यजिपदाभावेऽपि यागकल्पनम्

'यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्याञ्चाच्युतो भवति' इत्यत्र 'यजेत' इत्याकारकपदाभावेऽपि यागविधायकत्वं मीमांसकैः अङ्गीकृतम्। यतः यागः नाम देवतोद्देशेन द्रव्यत्यागः। प्रकृते 'आग्नेयः' इति तद्धितप्रत्ययान्तं पदम्। तस्य 'अग्निः देवता अस्य' इति व्युत्पत्तिः। 'अस्य' इत्यादिसर्वनाम्नः प्रकृतपरामर्शित्वनियमात् प्रकृतम् अष्टाकपालं परामृशति। 'अष्टसु कपालेषु संस्कृतः पुरोडाशः अष्टाकपालः'। अग्निदेवतायाः पुरोडाशद्रव्यस्य च एकपदोपादानात्, एकवाक्योपादानाद्वा सम्बन्धः अवगम्यते। स च सम्बन्धः यागात् अन्यत्र क्रियान्तरेषु न सम्भवति। अतः श्रुतद्रव्यदेवतासम्बन्धानुमितः यागः भूधातुना लक्ष्यते। सः च यागः विधीयते। एवं यत्र द्रव्यदेवतासम्बन्धः श्रूयते, तत्र सर्वत्र यजेः अभावेऽपि यागः लक्ष्यते।



२. लिङाद्यभावेऽपि विधायकत्वम्

वस्तुतः लिङ्, लेट् लोट्, इत्यादीनामेव विधायकत्वं वक्तव्यम्। परं 'यजति, जुहोति, प्रोक्षति' इत्येवं लटः श्रवणेऽपि विधायकत्वं शास्त्रे

यजतिपदाभावेऽपि द्रव्यदेवतासम्बन्धसत्वे यागः लक्ष्यते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दृष्टम्। तच्च कथं सम्भवति इति चेत्, 'यजति' इत्येवं श्रवणेऽपि 'यजेत' इत्येवं विपरिणामं प्रकल्प्य विधायकत्वं सम्भवति। अथवा 'लेट् वेदे' इति श्रवणात् लेट्त्वनिश्चयात् विधायकत्वं सम्भवति।



३. स्तोत्रलक्षणम्

गीतिविशिष्टमन्त्रोच्चारणपूर्वकं गुणिनः गुणस्य कथनं येन क्रियते तत् स्तोत्रम्।

प्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानम् इति स्तोत्रस्वरूपम्।

४. शस्त्रलक्षणम्

गीतिरहितमन्त्रोच्चारणपूर्वकं गुणिनः गुणस्य कथनं येन क्रियते तत् शस्त्रम्।

अप्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानम् इति शास्त्रस्वरूपम्।

५. मन्त्रलक्षणम्

प्रयोगसमवेतार्थप्रकाशकाः मन्त्राः इति सामान्यं लक्षणम्। 'अयं मन्त्रः' इति अभियुक्तानां मन्त्रपदवाच्यत्वप्रकारिका उपस्थितिः विषयतासम्बन्धेन यत्र सः मन्त्रः इति निर्दुष्टं लक्षणम्।

अयं मन्त्रः इति अभियुक्तैः निर्दिष्टः वेदभागः एव मन्त्रः भवति।

वैदिकलेट् इति लकारः लट्लकारवत् भवति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

६. ब्राह्मणलक्षणम्

'मन्त्रब्राह्मणयोः वेदनामधेयम्' इति उक्तत्वात्, प्रधानतया मन्त्रः, ब्राह्मणमिति वेदस्य विभागद्वयं विद्यते। मन्त्रान् विहाय इतरः वेदभागः ब्राह्मणं भवति।

मन्त्रातिरिक्तवेदत्वम् इति ब्राह्मणलक्षणम्।

७. ऋग्लक्षणम्

गायत्र्यादिछन्दोवशेन पादव्यवस्थावत्त्वे सति मन्त्रत्वम् इति ऋचः लक्षणम्।

८. सामलक्षणम्

मन्त्रत्वसमानाधिकरणगीतित्वम् इति साम्नः लक्षणम्।

९०. यजुर्लक्षणम्

ऋक्सामभिन्नमन्त्रत्वम् इति यजुर्लक्षणम्।

१०. एकवाक्यत्वम्

यस्य वाक्यस्य विभागः क्रियते चेत् आकांक्षा भवति, विभागः न क्रियते चेत् एकार्थस्य प्रतीतिः भवति तत् एकं वाक्यम् इति लक्षणम्। यथा 'देवस्य त्वा सवितुः प्रसवे अश्विनोः बाहुभ्यां पूष्णो हस्ताभ्याम्, अग्नये जुष्टं निर्वपामि' इति।

यत् विभागे साकाङ्क्षम्, अविभागे एकार्थकं तदेकं वाक्यम्

मीमांसकैः वेदस्य पञ्च विभागाः अङ्गीकृताः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तृतीयपाठस्य सारः

यागबोधकस्य 'यजेत' इति पदस्य अभावेऽपि द्रव्यदेवता-सम्बन्धेन यागः धातुना लक्ष्यते। यथा 'सौर्यं चरुं निर्वपेत्' इत्यादौ, सूर्यरूपदेवतायाः चरुरूपद्रव्यस्य च सम्बन्धात् निर्वपतिना यागः लक्ष्यते। 'भवति' इत्यादिलङन्तपदश्रवणेऽपि यत्र अप्राप्तार्थः प्रतीयते तत्र लिङर्थः लक्ष्यते।

गीतिविशिष्टमन्त्रोच्चारणपूर्वकं गुणिनः गुणस्य कथनं येन क्रियते तत् स्तोत्रम्।

गीतिरहितमन्त्रोच्चारणपूर्वकं गुणिनः गुणस्य कथनं येन क्रियते तत् शस्त्रम्।

'अयं मन्त्रः' इति अभियुक्तानां मन्त्रपदवाच्यत्वप्रकारिका उपस्थितिः विषयतासम्बन्धेन यत्र सः मन्त्रः।

मन्त्रातिरिक्तवेदत्वम् इति ब्राह्मणलक्षणम्।

गायत्र्यादिछन्दोवशेन पादव्यवस्थावत्त्वे सति मन्त्रत्वम् इति ऋचः लक्षणम्।

मन्त्रत्वसमानाधिकरणगीतित्वम् इति साम्नः लक्षणम्।

ऋक्सामभिन्नमन्त्रत्वम् इति यजुर्लक्षणम्।

यस्य वाक्यस्य विभागे आकांक्षा भवति, अविभागे एकार्थस्य प्रतीतिः भवति तत् एकं वाक्यम् इति लक्षणम्।

अर्थभावना, प्रवृत्तिः, कृतिः यत्नः, आर्थी इति पर्यायपदानि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभ्यासाः

१. एकाङ्कप्रश्नाः

अ. एकेन पदेन उत्तरत

१. लेट्लकारस्य उदाहरणं किम्?

२. प्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं किम्?

३. यदाग्नेयवाक्ये भवतिना किं विधीयते?

४. द्रव्यदेवतासम्बन्धः यत्र प्रतीयते सः कः?

५. मन्त्रब्राह्मणयोः किं नामधेयम्?

आ. एकेन वाक्येन समाधत्त

१. अष्टाकपालः इत्यस्य व्युत्पत्तिः का?

२. भवतिना कथं यागः अनुमीयते?

३. विधायकप्रत्ययाः के?

४. स्तोत्रस्य लक्षणं किम्?

५. शस्त्रस्य लक्षणं किम्?

६. मन्त्रस्य लक्षणं किम्?

७. ब्राह्मणस्य लक्षणं किम्?

८. ऋचः लक्षणं किम्?

९. साम्नः लक्षणं किम्?

१०. यजुषः लक्षणं किम्?

११. एकवाक्यत्वस्य लक्षणं किम्?

१२. एकवाक्यत्वस्य उदाहरणं किम्?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. साधूत्तरं योजयत

१. आग्नेयः	अ) द्रव्यं
२. अष्टाकपालः	आ) देवता
३. भवति	इ) वैदिकं लिङ्
४. लेट्	ई) यागलक्षकः

३. एकं पृथक् कुरुत

१. एषु एतत् नान्तर्भवति

१) ऋक् २) साम ३) यजुः ४) मन्त्रः

४. रिक्तस्थानं पूरयत

१. देवस्य त्वा सवितुः प्रसवे.........।

२. यदाग्नेयोष्टाकपालो.............।

३. अष्टसु कपालेषु..................।

४. यद्विभागे साकांक्षं................।

५. मन्त्रातिरिक्तवेदत्वं ....।

५. पञ्चाङ्कप्रश्नाः

१. मन्त्रब्राह्मणयोः, तदवान्तरविभागानां च लक्षणं निरूपयत?

६. दशाङ्कप्रश्नः

१. यजिलिङाद्यभावेपि कथं यागः विधीयते?

❀❀❀

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चतुर्थपाठाध्ययनस्य प्रयोजनानि

१. वयम् एनं पाठं पठित्वा भावनाभेदबोधकानि प्रमाणानि कानि इति अवगच्छामः।

पाठे अन्तर्गताः प्रधानविषयाः



भावनाभेदेन अपूर्वभेदः सिद्ध्यति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. चतुर्थः पाठः - भावनाभेदकप्रमाणानि

भावनाभेदबोधकानि षट् प्रमाणानि वर्तन्ते। शब्दान्तरम्, अभ्यासः, संख्या, संज्ञा, गुणः, प्रकरणान्तरम् इति।



१.शब्दान्तरम्

'शब्दान्तरं नाम अपर्यायधातुभेदः' इति प्राञ्चः। 'विभिन्नधात्वर्थकत्वम्' इति नवीनाः। एकप्रकरणगतानि विभिन्नार्थकानि 'यजेत, ददाति, जुहोति' इत्यादीनि पदानि कर्मभेदं बोधयन्ति। तद्वारा भावनाभेदबोधकानि।

प्रकृते धातुभेदात् धात्वर्थभेदः स्वयं सिद्धः। सः एव कर्मभेदः। तादृशकर्मभेदात् तदनुकूलायाः भावनायाः अपि भेदः मन्तव्यः। भावना नाम यत्नः। यत्नस्य भेदाभावे विभिन्नकर्माणि न सिद्ध्यन्ति इति भावनाभेदः सिद्ध्यति।

धातुभेदः भावनाभेदज्ञापकः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शब्दान्तरम्

यजेत, ददाति, जुहोति

एकप्रकरणगतानि विभिन्नधातुपदानि

२. अभ्यासः

'अविशेषपुनश्श्रवणम्', 'अनन्यपरविधिपुनश्श्रवणं' वा अभ्यासः। यथा 'समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिः यजति, स्वाहाकारं यजति' इति पञ्चवाक्यानि प्रयाजानां विधायकानि। 'यजति' इत्यत्र धात्वर्थः यागः। सः च विधीयते। परं यदि एकः यागः पञ्चभिः वाक्यैः विधीयते, तर्हि विहितस्य पुनः विधानं व्यर्थमिति आपद्यते। पुनश्च विहितस्य विधानमपि न सम्भवति। यतः विधिना अज्ञातार्थः ज्ञापनीयः। यदि विहितस्यैव विधानं क्रियते तदा अज्ञातज्ञापनं न स्यात्। एवं पुनर्विधानासामर्थ्यात् पूर्ववाक्यविहितकर्मापेक्षया उत्तरवाक्यविहितकर्मणः भेदः सिद्ध्यति। कर्मभेदे सिद्धे शब्दान्तरादेव भावनाभेदः।

अभ्यासः

समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिः यजति, स्वाहाकारं यजति

विधेः आवृत्तिः कर्मभेदं ज्ञापयति

एकपदार्थविधायकस्य विधेः आवृत्तिः अभ्यासः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. सङ्ख्या

उत्पत्तिवाक्ये श्रुता कर्मसमानाधिकरणा संख्या कर्मभेदं बोधयति। 'तिस्र: आहुती: जुहोति' इत्यत्र आहुतिविशेषणत्वेन त्रित्वसङ्ख्या श्रुता। सा सङ्ख्या स्वाश्रयस्य धात्वर्थस्य कर्मण: भेदं विना निवेष्टुम् अशक्या। अत: धात्वर्थस्य भेदम् आपादयति। एवं कर्मभेदे सिद्धे शब्दान्तरादेव भावनाभेद:।



४. संज्ञा

'अथैष ज्योति:, अथैष: विश्वज्योति:, अथैष: सर्वज्योति: एतेन सहस्रदक्षिणेन यजेत' इति श्रुतम्। एकस्मिन् कर्मणि एकाधिकनाम्न: विकल्पेनापि निवेशयितुम् अशक्यते। तत्र ज्योतिरादिसंज्ञारूपनामधेयेन ज्योतिष्टोमात् भिन्ना: एव यागा: विधीयन्ते इति ज्ञायते। नामधेयस्य कार्यं व्यवहार:। स: एकेनैव नाम्ना सिध्यति। एकस्य कर्मण: अनेकानि नामधेयानि व्यर्थानि। अत: नामधेयभेद: कर्मभेदं बोधयति।

अथशब्दस्य तु पूर्वतनस्य यागाधिकारस्य विच्छेदकत्वम्। कर्मभेदाभावे अथशब्दस्य वैयर्थ्यापत्ति:।

नामभेदात् कर्मभेद:, तेन भावना भिन्ना इति ज्ञाप्यते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

संज्ञा

अथैष ज्योति:, अथैष: विश्वज्योति:, अथैष: सर्वज्योति: एतेन सहस्रदक्षिणेन यजेत

एककर्मण: ज्योति:, विश्वज्योति:, सर्वज्योति: इति विभिन्ननामधेयानि व्यर्थानि

५. गुण:

पूर्वस्मिन् कर्मणि, एकत्र वा अनिविशमान: उत्पत्तिवाक्ये श्रुत: गुण: कर्मभेदम् आपादयति। कर्मण: द्वे रूपे द्रव्यं देवता च इति। रूपभेदे सति कर्म भिद्यते। कर्मभेदात् भावनाभेद:। यथा -'तप्ते पयसि दध्यानयति, सा वैश्वदेव्यामिक्षा, वाजिभ्यो वाजिनम्' इत्यत्र आद्यवाक्येन विश्वदेवदेवताक: आमिक्षाद्रव्यक: याग: विहित:। उत्पत्तिवाक्ये एव आमिक्षाद्रव्यस्य श्रुतत्वात् द्रव्यान्तरस्य आकाङ्क्षा तु न भवति। अत: उत्तरवाक्येन विहितस्य वाजिनद्रव्यस्य पुन: आमिक्षायागे आमिक्षारूपगुणेन अवरोधात् निवेश: न सम्भवति। अत: आमिक्षाद्रव्यकं कर्म अन्यत्, वाजिनद्रव्यकं कर्म अन्यत् इति गुणात् कर्मभेद:। प्रकृते गुणशब्देन आमिक्षारूपं द्रव्यं स्वीकार्यम्।

गुण:

तप्ते पयसि दध्यानयति, सा वैश्वदेव्यामिक्षा, वाजिभ्यो वाजिनम्

↓ देवता | ↓ द्रव्यम् | ↓ देवता | ↓ द्रव्यम्

गुणविधिना एकस्मिन् कर्मणि एकस्य एव द्रव्यस्य निवेशे अवकाश:

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

६. प्रकरणान्तरम्

अनुपादेयगुणसहकृता पूर्वकर्मणः अनुपस्थितिः प्रकरणान्तरम्।



७. अनुपादेयगुणाः

१ २ ३ ४ ५

'देशः कालो निमित्तं च फलं संस्कार्यमेव च।
मीमांसानिपुणाः प्राहुः अनुपादेयपञ्चकम्।।'

अग्निहोत्रप्रकरणे श्रूयते 'अग्निहोत्रं जुहोति' इति। इदं कर्म नित्याग्निहोत्ररूपम्। कुण्डपायिनामयने श्रुतं कर्म 'मासम् अग्निहोत्रं जुहोति' इति वाक्यविहितं कर्म। कुण्डपायिनः नाम केचन ऋषिविशेषाः। अयनं नाम संवत्सरसाध्यं सत्रम्। तैः अनुष्ठितत्वात् तन्नाम। प्रकृते श्रुतः अनुपादेयगुणः मासाख्यः कालः। सः न विधेयः। इदं च कर्म प्रसिद्धाग्निहोत्रकर्मणः अपेक्षया अतिदूरस्थमिति प्रसिद्धाग्निहोत्रकर्मणः अनुपस्थितिः वर्तते। अतः प्रसिद्धनित्याग्निहोत्रम् अनूद्य मासाख्यगुणस्य विधानं न सम्भवति।

अनुष्ठेयत्वाभावः पदार्थस्य अनुपादेयत्वम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विधेयस्य पदार्थस्य कृतिविषयत्वापरपर्यायोपादेयत्वं भवति। प्रकृतविधिवाक्ये पदार्थद्वयं श्रुतम्। एकम् अग्निहोत्राख्यं कर्म, द्वितीयः मासाख्यः गुणः। कालस्य अनुपादेयत्वात्, उपादेयत्वम् अग्निहोत्रस्यैव भवति। उपादेयत्वं यस्मिन् अधिकरणे भवति, तत्रैव विधेयत्वमपि तिष्ठति। परं पूर्वं विहितस्य विधानायोगात् मासाग्निहोत्रस्य कर्मान्तरत्वं सिध्यति। एवं प्रकरणान्तरात् नित्याग्निहोत्रकर्मणापेक्षया इदं मासाग्निहोत्रं भिन्नम्।

एवं प्रमाणषट्कोपेतः भावनाभेदः द्वितीयाध्याये प्रतिपाद्यविषयः भवति।

चतुर्थपाठस्य सारः

शब्दान्तरम्, अभ्यासः, संख्या, संज्ञा, गुणः, प्रकरणान्तरम् इति भावनाभेदबोधकप्रमाणानि षट् सन्ति।

शब्दान्तरत्वं नाम विभिन्नधात्वर्थकत्वम्। एकप्रकरणगतानि विभिन्नार्थकानि 'यजेत, ददाति, जुहोति' इत्यादीनि पदानि भावनाभेदस्य बोधकानि।

अनन्यपरविधिपुनश्श्रवणम् अभ्यासः। यथा 'समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिः यजति, स्वाहाकारं यजति' इत्यत्र धात्वर्थः यागः विधीयते। पूर्वविधिना विहितस्य कर्मणः विधानं कर्तुं न शक्यते। अतः पूर्ववाक्यविहितकर्मणः उत्तरवाक्यविहितकर्मणः भेदः सिद्ध्यति।

कर्मभेदः अध्यायार्थः इति प्राचीनाः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

'तिस्रः आहुतीः जुहोति' इत्यादौ आहुतिविशेषणत्वेन श्रुता त्रित्वसङ्ख्या स्वाश्रयस्य धात्वर्थस्य कर्मणः भेदं विना निवेष्टुम् अशक्या। अतः कर्मणः भेदम् आपादयति।

'अथैष ज्योतिः, अथैषः विश्वज्योतिः, अथैषः सर्वज्योतिः एतेन सहस्रदक्षिणेन यजेत' इत्यादौ एकस्य कर्मणः अनेकानि नामानि व्यर्थानि। अतः श्रुता संज्ञा कर्मभेदं ज्ञापयति।

एकत्र अनिविशमानः उत्पत्तिवाक्ये श्रुतः गुणः कर्मभेदम् आपादयति। यथा - 'तप्ते पयसि दध्यानयति, सा वैश्वदेव्यामिक्षा, वाजिभ्यो वाजिनम्' इत्यत्र आमिक्षाद्रव्यके यागे वाजिनद्रव्यस्य निवेशः न सम्भवति। अतः वाजिनरूपगुणात् कर्मभेदः।

अनुपादेयगुणसहकृतपूर्वकर्मणः अनुपस्थितिः प्रकरणान्तरम्। 'मासम् अग्निहोत्रं जुहोति' इत्यत्र मासाख्यानुपादेयगुणेन सह प्रसिद्धाग्निहोत्रकर्मणः अनुपस्थितिः वर्तते। अतः प्रसिद्धनित्याग्निहोत्रकर्मणः अपेक्षया इदं मासाग्निहोत्रं भिन्नम्।

अभ्यासाः

१. एकाङ्कप्रश्नाः

अ. एकेन पदेन उत्तरत

१. भावनाभेदकप्रमाणानि कति सन्ति?

२. अभ्यासः नाम कः?

३. संख्या नाम का?

कर्मभेदाङ्गत्वनिरूपणयोः हेतुहेतुमद्भावसङ्गतिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. संज्ञा नाम किम्?

४. मासाग्निहोत्रं जुहोति इत्यत्र कर्मभेदकं प्रमाणं किम्?

आ. एकेन वाक्येन समाधत्त

१. भावनाभेदकप्रमाणानि कानि?

२. शब्दान्तरं नाम किम्?

३. शब्दान्तरात् कुत्र भावनाभेदः?

४. अभ्यासात् कुत्र भावनाभेदः?

५. संख्यया कुत्र भावनाभेदः?

६. संज्ञया कुत्र भावनाभेदः?

७. गुणात् कुत्र भावनाभेदः?

८. प्रकरणान्तरात् कुत्र भावनाभेदः?

९. गुणः नाम कः?

१०. प्रकरणान्तरं नाम किम्?

११. अनुपादेयपञ्चकं किम्?

२. साधूत्तरं योजयत

१. अभ्यासः	अ) यजेत, जुहोति
२. सङ्ख्या	आ) प्रयाजः
३. प्रकरणान्तरम्	इ) आमिक्षायागः
४. शब्दान्तरम्	ई) ज्योतिः, विश्वज्योतिः
५. गुणः	उ) मासाग्निहोत्रम्
६. संज्ञा	ऊ) तिस्रः आहुतीः जुहोति

विधिः, प्रेरणा, प्रवर्तना, शाब्दी, शब्दभावना, चोदना इति पर्यायपदानि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. एकं पृथक् कुरुत

१. एषु एतत् नान्तर्भवति

१) शब्दान्तरम् २) अभ्यास: ३) संख्या ४) काल:

४. रिक्तस्थानं पूरयत

१. अपर्यायधातुभेद:................।

२. अनन्यपरविधिपुन: श्रवणं ....।

३. अथैष: ज्योति:..................।

४. तप्ते पयसि.....................।

५. देश: कालो ....।

५. पञ्चाङ्कप्रश्ना:

१. अभ्यासात् कर्मभेदं निरूपयत?

२. संख्यया कर्मभेदं निरूपयत?

३. संज्ञया कर्मभेदं निरूपयत?

४. शब्दान्तरात् कर्मभेदं निरूपयत?

५. गुणात् कर्मभेदं निरूपयत?

६. प्रकरणान्तरात् कर्मभेदं निरूपयत?

७. अनुपादेयपञ्चकं किम्, तत्सत्त्वे कर्मभेद: कथम्?

६. दशाङ्कप्रश्न:

१. कर्मभेदबोधकप्रमाणानि व्याख्यात?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



वेदे कर्मकाण्डस्य निरूपणपरं दर्शनं मीमांसादर्शनम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



जैमिनिप्रणीतं सूत्रजातं मीमांसाशास्त्रे मूलम्

CC-0. In Public Domain. Cuddalore Collection. TN.

३

द्वादशलक्षणी

प्रमाणम्	कर्मभेदः	शेषत्वम्,प्रयुक्तिः	क्रमः,अधिकारः	अतिदेशः,विशेषातिदेशः	ऊहः	बाधः	तन्त्रम्,प्रसङ्गः
विधिः	शब्दान्तरम्	श्रुतिः	श्रुतिः	नामातिदेशः	सामोहः	प्रतिषेधात्	
अर्थवादः	अभ्यासः	लिङ्गम्	अर्थः	वचनातिदेशः	मन्त्रोहः	प्रत्याम्नानात्	
मन्त्रः	संख्या	वाक्यम्	पाठक्रमः	चोदनालिङ्गातिदेशः	संस्कारोहः	अर्थलोपात्	
स्मृतिः	संज्ञा	प्रकरणम्	स्थानम्				
आचारः	गुणः	स्थानम्	मुख्यक्रमः				
नामधेयम्	प्रकरणान्तरम्	समाख्या	प्रवृत्तिक्रमः				
वाक्यशेषः							
सामर्थ्यम्							

द्वादशभिः अध्यायार्थैः धर्मः एव व्युत्पाद्यः

Digitization by eGangotri-South Center
CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



वाक्यार्थे भावना मुख्यविशेष्या भवति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



सर्वप्रबलश्रुतिः समानाभिधानश्रुतिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



अज्ञातविषयबोधकत्वं विधित्वम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



नामधेये चत्वारि एव निमित्तानि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



विधिवाक्येन साकम् एकवाक्यतां प्राप्य अर्थवादः धर्मे प्रमाणम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विशेषविचार:

प्रथमपरिच्छेद: - उपोद्घात:

१. 'दर्शनम्' इति पदे प्रेक्षणार्थक: 'दृशिर्' इति धातु:, एवं 'ल्युट्'प्रत्ययश्च वर्तेते। अयं प्रत्ययो भावकरणकर्माधिकरणाद्यर्थेषु प्रयुक्त:। दर्शनमित्यत्र यदि ल्युटो भावार्थकत्वं तदा 'दृश्यत इति दर्शनम्' इति भावव्युत्पत्ति: साध्वी। अर्थस्तु 'ज्ञानम्' इति भवति। यदि करणव्युत्पत्ति: आश्रीयते, तदा दर्शनं, 'ज्ञानसाधनम्' इत्यर्थ: भवति। तदा 'दृश्यते अनेन' इति व्युत्पत्ति:। येन साधनेन ब्रह्म, जगत्, जीव इत्यादयो यथार्थतया दृश्यन्ते, समीक्ष्यन्ते तत् दर्शनं भवति। वाचस्पत्ये तु 'दृश्यते यथार्थतया ज्ञायते पदार्थ: अनेन' इति व्युत्पत्ति: प्रादर्शि।

२. धर्मलक्षणप्रतिपादकं **चोदनालक्षणोऽर्थो धर्म:** इति जैमिनीयं द्वितीयं सूत्रम्। चोदनाशब्दस्य विधि: इत्यर्थ:। लक्षणं नाम प्रमाणम् । एवं चोदनासूत्रानुसारं विधिबोधितो धर्मो भवति। वेद: - विधि:, मन्त्र:, नामधेयम्, निषेध:, अर्थवाद इति पञ्चधा विभक्त:। अर्थात् विधिरिति वेदस्य एको विभाग:। विधिमन्त्रनामधेयनिषेधार्थवादा: इति पञ्चांशा: मिलित्वा वेदो भवति। इत्थं सूत्रे विधिरूपवेदैकदेशगम्यो धर्म इत्युक्तम्। अर्थसंग्रहादिग्रन्थे तु वेद: अर्थात् विध्यादिपञ्चविभागै: बोध्यो धर्म इत्युक्तम्। एवं सूत्रोक्तस्य धर्मलक्षणस्य ग्रन्थोक्तधर्मलक्षणस्य च विरोध: सम्भवति खलु इति चेत् विध्यादिपञ्चवेदविभागैरपि धर्म एव प्रतिपाद्यत इति समग्रस्यापि वेदस्य धर्म: एव तात्पर्यविषय इति हेतो: सूत्रघटकस्य चोदनापदस्य वेदरूपार्थे उपलक्षणा। इत्थं चोदना अर्थात् वेद: धर्मे प्रमाणं भवति।

३. मान पूजायाम् इति धातुना निष्पन्न: शब्द: मीमांसा इति।

धर्मलक्षणप्रतिपादकं सूत्रम्, चोदनालक्षणोऽर्थो धर्म: इति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. 'मान पूजायाम्' इति पूजार्थकात् 'मान' इति धातोः 'मानेर्जिज्ञासायाम्' इति वररुचिवार्तिकबलात् जिज्ञासार्थे 'मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासश्च' इति सूत्रेण 'सन्' इति प्रत्यये कृते 'मीमांसा' इति शब्दस्य निष्पत्तिः भवति।

५. मीमांसा इत्यत्र मान धातोः जिज्ञासार्थे सन् इति प्रत्ययः विहितः। जिज्ञासा पुरुषकृतिसाध्या न भवतीति जिज्ञासापदस्य विचारार्थे लक्षणा। तथा च मीमांसा इति शब्दस्य अर्थो भवति पूजितविचार इति। उक्तं च भामत्यां 'पूजितविचारवचनो हि मीमांसाशब्दः' इति।

६. द्वादशलक्षणी - प्रकृते लक्षणं नाम अध्यायः इति। द्वादश लक्षणानि यस्याः सा द्वादशलक्षणी। मीमांसायां द्वादशाध्यायाः वर्तन्त इति द्वादशलक्षणी इति नाम सङ्गच्छते।

७. तनोति त्रायते चेति तन्त्रम्। वेदार्थं विस्तारयति, संशयात् त्रायते इति तन्त्रम्। 'तनोति विपुलान् अर्थान् तत्त्वमन्त्रसमन्वितान्,

त्राणं च कुरुते यस्मात् तन्त्रमित्यभिधीयते'

'प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।

पुसां येनोपदिश्येत तच्छास्त्रमिति कथ्यते।।' इति शास्त्रलक्षणम्।

८. 'तर्क्यन्ते अवधार्यन्ते विचारपूर्वकं वेदार्थाः यत्र इति तर्कः', 'यः तर्केणानुसन्धत्ते सः धर्मं वेद नेतरः', 'मीमांसासंज्ञकस्तर्कः सर्ववेदसमुद्भवः' इत्यादिवचनानि मीमांसायाः तर्कपदवाच्यत्वे प्रमाणम्।

९. कर्मकाण्डज्ञानकाण्डभेदेन वेदः द्विविधः। कर्मकाण्डसम्बद्धवेदविचारार्थं मीमांसा प्रवर्तते। विध्यर्थवादमन्त्रनामधेयादीन् विचार्य परस्परविरोध-परिहारपुरस्सरं विचारः अर्थात् विषयनिर्णयः मीमांसया एव क्रियते।

वेदार्थनिर्णयफलकं शास्त्रं मीमांसा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१०.'धर्मो द्वादशलक्षण्यां व्युत्पाद्यः तत्र लक्षणैः
प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकः।।
अधिकारोऽतिदेशश्च सामान्येन विशेषतः।
ऊहो बाधश्च तन्त्रञ्च प्रसङ्गश्चोदिताः क्रमात्।।'

द्वितीयपरिच्छेदात् - अष्टमपरिच्छेदान्तम्

१. अज्ञातार्थज्ञापकः वेदभागः विधिः इति विधिलक्षणम्। लक्षणे वेदभागत्वमात्रोक्तौ मन्त्रादिवेदभागेषु अतिव्याप्तिः। अतः तन्निवारणाय अज्ञातार्थज्ञापकत्वमिति दलम्। अज्ञातार्थज्ञापकत्वमात्रोक्तौ लौकिकवाक्ये अतिव्याप्तिः। अतः तन्निवारणाय वेदभाग इति दलम्।

२.पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्।
प्रतिषेधः स विज्ञेयो यत्र पूर्वपदेन नञ्।। इति।

३. प्राशस्त्यनिन्दान्यतरपरं वाक्यम् अर्थवादः। प्राशस्त्यनिन्दान्यतरपरत्वे सति वाक्यत्वम् इति अर्थवादलक्षणम्। वाक्यत्वमात्रोक्तौ विध्यादिवाक्ये अतिव्याप्तिः। अतः तन्निवारणाय प्राशस्त्यनिन्दान्यतरपरत्वम् इति दलम्। तावन्मात्रोक्तौ तत्परलौकिकवाक्ये अतिव्याप्तिः। अतः वाक्यत्वमिति दलम्। अत्र वाक्यशब्देन वेदवाक्यस्यैव विवक्षा।

४. प्रयोगसमवेतार्थप्रकाशकाः मन्त्राः। प्रयोगः नाम अनुष्ठानम्। समवेतः नाम सम्बद्धः। अर्थः विषयः। अनुष्ठानकालीनद्रव्यदेवतादिविषय-प्रकाशकत्वेनैव मन्त्राणां प्रयोजनवत्त्वम्। न तु मन्त्राणाम् उच्चारणम् अदृष्टार्थं प्रयोगकाले क्रियते।

अर्थस्मरणमेव सम्भवतां मन्त्राणां प्रयोजनम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

५. अत्यन्ताप्राप्तार्थप्रापको विधिः अपूर्वविधिः। प्रमाणान्तरेण अज्ञातार्थज्ञापकः विधिः इति यावत्।

विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति।

तत्र चान्यत्र प्राप्ते परिसंख्येति गीयते।। इति।

६. नानासाधनसाध्यक्रियायाम् एकसाधनस्य प्राप्तौ अप्राप्तस्य अपरसाधनस्य प्रापको विधिः नियमविधिः। अवहननादिनानासाधनसाध्यवितुषीभावक्रियायां नखविदलनरूपैकसाधनस्य प्राप्तौ अप्राप्तस्य अवहननरूपापरसाधनस्य प्रापको **व्रीहीन् अवहन्ती**ति विधिः नियमविधिः। नियमविधौ अप्राप्तांशपूरणमेव वाक्यार्थः। अत्र पाक्षिकप्राप्तिः अपेक्षिता। तदा अप्राप्तपक्षस्य पूरणं नियमविधिना क्रियते।

७. परिसंख्या नाम वर्जनबुद्धिः इत्यर्थः। उभयोश्च युगपत् प्राप्तौ इतरव्यावृत्तिपरको विधिः परिसंख्याविधिः। अत्र पक्षद्वयस्य युगपत् प्राप्तिः अपेक्षिता। तदा अन्यतरपक्षस्य निवृत्तिः अनेन क्रियते। निवृत्तौ एव अस्य विधेः तात्पर्यम्।

८. **त्रीणि हवै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुप् अत्र ह्येवावपन्ति, अत एव उद्वपन्ति** इति वाक्यं ज्योतिष्टोमे श्रूयते। गायत्रीबृहत्यनुष्टुप्छन्दांसि यज्ञस्य उदरस्थानीयानि भवन्ति। यदि स्तोत्रेषु साम्नाम् आवापोद्वापौ क्रियेते, तर्हि तत्रैव कर्तव्यौ इति एतद्वचनं वक्ति। ज्योतिष्टोमे द्वादश स्तोत्राणि भवन्ति। यथा प्रातस्सवने एकं बहिष्पवमानस्तोत्रम्, चत्वारि आज्यस्तोत्राणि, माध्यन्दिनसवने एकं माध्यन्दिनपवमानम्, चत्वारि पृष्ठस्तोत्राणि, तृतीयसवने एकम् आर्भवपवमानम्, एकं यज्ञायज्ञीयमिति। तेषां संख्या अपि इत्थं श्रूयते, यथा - **त्रिवृत् पञ्चदशः, सप्तदशः, एकविंश** इति

पाक्षिकप्राप्तौ नियमविधिः, युगपत् प्राप्तौ परिसंख्या

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्तोत्रसाधनाय तृचः भवन्ति। तत्र **एकं साम तृचे क्रियते, स्तोत्रीयमिति** वचनेन साम्नां विधानमस्ति।

विकृतौ काश्चन विवृद्धस्तोमकाः काश्चन अविवृद्धस्तोमकाः भवन्ति। यत्र प्रकृतितः अतिदिष्टस्तोमापेक्षया अधिकसंख्याकस्तोमाः सन्ति, तत्र विवृद्धस्तोमकाः इति व्यवहारः। स्तोत्रवृद्ध्यर्थं सामान्तराणि आनेतव्यानि। तेषाम् आवापः पवमानादिस्तोत्रेषु प्राप्तः। तदा **अत्र हि** इत्यनेन पवमानातिरिक्तस्तोत्राणां विवृद्धेः परिसंख्यानं क्रियते। यद्यपि पवमानस्तोत्रे एव आवापः कार्य इति बोधनाय प्रत्यक्षः शब्दो नास्ति। तथापि अत्र इति त्रल्प्रत्ययान्तात् इदंशब्दात्, पूर्वपरामर्शकात् पूर्वोक्त "छन्दोत्रययुक्तेष्वेव" आवापः कार्य इति स्वीक्रियते।

९. पञ्चपञ्चनखाः भक्ष्याः ब्रह्मक्षत्रेण राघव।

शशकः शल्लको गोधा खड्गी कूर्मोथ पञ्चमः।। इति रामायणे श्रुतः श्लोकः।

१०. स्मृतिः धर्मे स्वतन्त्रतया नाम वेदवत् अथवा वेदतुल्यत्वेन वा न प्रमाणम्। अपि तु वेदमूलकतया प्रमाणम् इति मीमांसकसिद्धान्तः। स्मृतीनां धर्मप्रामाण्यसङ्ग्रहार्थं वेदबोध्यत्वमित्यत्र वेदातिरिक्तप्रमाणेन स्वातन्त्र्येण अबोध्यत्वे सति वेदबोध्यत्वम् इति परिष्कारः कृतः। तेन स्मृत्याचारयोः सङ्ग्रहः भवति। वेदविरुद्धार्थकस्मृतीनाम् अप्रामाण्यं भाष्यकारैः प्रतिपादितम्। वार्तिककृता तु यावत् श्रुतिदर्शनं न सम्भवति तावत् अननुष्ठानलक्षणम् अप्रामाण्यं प्रतिपादितम्। वेदे विद्यमानाः एव विषयाः स्मृतौ पुनः शाखान्तरोपसंहारार्थम्, अर्थवादोद्धारार्थम्, एवं न्यायसिद्धार्थ-कथनार्थं च प्रणीताः।

वेदमूलकतया एव सर्वस्मृतीनां प्रामाण्यम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

११. आचारोपि न साक्षात् प्रमाणम्। न वा स्वतन्त्रं प्रमाणम्। अपि तु वेदमूलकतया एव प्रमाणम्। आचारेण स्मृतिकल्पनां कृत्वा, स्मृत्या श्रुतिकल्पनां कृत्वा प्रमाणं भवति। आचारः सर्वदुर्बलं प्रमाणम्। आचारस्मृत्योः विरोधे, आचारश्रुत्योः विरोधे आचारः न प्रमाणम्।

१२. नामधेयधात्वर्थयोः सामानाधिकरण्येन अन्वयः। विधिना धात्वर्थः यागादिः विधीयते। यागसामान्यं विधातुं न शक्यते। यतः यागसामान्ये पुरुषस्य प्रवृत्तिः न जायते। पुरुषप्रवृत्त्यभावे विधेः वैयर्थ्यं सम्भवति। अतः यागविशेषः विधेयः। यागविशेषं नामधेयं समर्पयति।

१३. सति सम्भवे शक्यार्थः प्रतिपादनीयः। अगतिकगतावेव लक्षणा आश्रयणीया। उद्भित्पदस्य गुणसमर्पकत्वे, गुणः अपि विधेयः, कर्म अपि विधेयम् इति उभयविधाने वाक्यभेदः आपतति। अतः वाक्यभेदपरिहाराय विशिष्टं विधेयम्। वैशिष्ट्यसम्पादनाय मत्वर्थः लक्षणीयो भवति। नामधेयत्वे तु न लक्षणा आश्रयणीया। अतः नामधेयत्वमेव युक्तम्।

१४. वाक्यभेदः -वाक्यस्य भेदः - पृथक्त्वम्। विधेः व्यापारो यत्र उभयत्र पृथक् भवति, तत्र वाक्यभेदः। स वाक्यभेदो द्विविधः। १. गौरवलक्षणः, २. विध्यावृत्तिकृतः च। विध्यावृत्तिरूपो वाक्यभेदः १. विधेयानेकत्वप्रयुक्तः, २. उद्देश्यानेकत्वप्रयुक्तश्च।

१. प्राप्ते कर्मणि अनेकविधाने सति यो वाक्यभेदः स विधेयानेकत्वप्रयुक्तः। यथा - 'चित्रया यजेत पशुकामः' इत्यत्र अग्नीषोमीयोद्देशेन चित्रत्वस्त्रीत्वयोः विधाने वाक्यभेदः।

लक्षणा पददोषः, वाक्यभेदः वाक्यदोषः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. अनेकोद्देशेन एकस्य विधेयस्य विधाने यो वाक्यभेदः स उद्देश्यानेकत्वप्रयुक्तः। यथा **ग्रहं संमार्ष्टि** इत्यत्र संमार्जनं विधीयते। अत्र ग्रहस्येव तद्गतैकत्वस्यापि उद्देश्यत्वे उद्देश्यानेकत्वात् वाक्यभेदो भवति।

श्रौतव्यापारनानात्वे शब्दानां यत् गौरवं स गौरवलक्षणः। यथा - सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः इत्यत्र सूर्यविशिष्टचरुविशिष्ट-ब्रह्मवर्चसफलकः यागो विधीयते। एवम् अनेकविधानात् विधेः गौरवमापतति।

१५. 'तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः।
देवतायाः विधिः तत्र दुर्बलन्तु परं परम्।।'

इति वचनपुरस्सरं 'सास्य देवता' इति व्याकरणस्मृत्या विहितः अण्प्रत्ययः देवताबोधकः। एवं सम्प्रदानवाचिनी चतुर्थी, मन्त्रः च देवताप्रतिपादकः इति ज्ञायते। तत्रापि एते त्रयः समप्राबल्येन न तावत् देवतां बोधयन्ति। अपि तु तद्धितप्रत्ययस्य चतुर्थीमन्त्रवर्णयोः अपेक्षया प्राबल्यम्। एवं चतुर्थ्यैः अपेक्षया मन्त्रस्य दौर्बल्यं विद्यते। एवं तद्धितप्रत्ययस्य सर्वापेक्षया प्राबल्यम्। एवं मन्त्रस्य सर्वापेक्षया दौर्बल्यम्।

दवताप्रापकप्रमाणानां प्राबल्यदौर्बल्यादेव तत्प्रतिपादितदेवतायाः बाध्यबाधकभावः सम्भवति।

१६. भवितुः भवनानुकूलः भावयितुः व्यापारविशेषः भावना इति शास्त्रीयं लक्षणम्। भवितुः - उत्पद्यमानस्य - स्वर्गादिफलस्य। भवितुः इति भवितृशब्दस्य षष्ठ्यन्तं रूपम्। भवनानुकूलः-उत्पत्यनुकूलः, तत्प्राप्त्यनुकूलः। भवनम् - जननम्, तदनुकूलः - तत्प्रयोजको वा।

अर्थभावना नाम प्रवृत्तिः, यत्नः, कृतिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भावयितुः - उत्पादकस्य - प्रयोजकपुरुषस्य। व्यापारविशेषः- कृतिरूपः प्रेरणारूपो वा व्यापारविशेषः, आत्मनिष्ठः गुणः। सः एव भावना।

१७. पुरुषप्रवृत्त्यनुकूलः भावयितुः व्यापारविशेषः शाब्दी भावना। पुरुष-प्रवृत्त्यनुकूलः- शिष्यादिरूपे पुरुषे यत्नजनकः, भावयितुः- प्रेरकस्य आचार्यादिपुरुषस्य व्यापारविशेष एव शब्दभावना। पुरुषप्रवृत्त्यनुकूलः - पुरुषस्य प्रवृत्तिः, तस्याः अनुकूलः तज्जनकः।

१८. प्रयोजनेच्छाजनितः क्रियाविषयव्यापारः अर्थभावना। स्वर्गादिरूपे फले रागादिना उत्पन्नो यागादिक्रियाविषयको यः पुरुषस्य व्यापारविशेषः सः अर्थभावना।

शब्दभावना नाम प्रेरणा, प्रवर्तना, विधिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

About the Author

Author : Dr. Shrirama A.S.
Father's Name : Shailajendra M
Mother's Name : Gouri
Permanent Address : At - Amblihonda,
Po - Urtota, Tq – Sirsi,
Dist – Uttara Kannda
Karnataka – 581 340
Mobile. No : 90322 91671
E-Mail : asshriram@gmail.com

Educational Qualifications - Acharya, M.Ed
Teaching Experience - Ten Years
Research Study - 1. Ph.D in Meemamsa
2. Ph.D. in Education

Professional Qualification- N.E.T.

Additional Qualifications - M.A. (Sanskrit),
P.G Diploma in Yoga Vijnana,
Diploma in Temple Culture

Medals : 4-Gold Medal, 1-Silver Medal, 1-Bronze Medal

Workshops & Trainings : 13
Seminars & Conference : 42
Session Chaired : 1

Lecture Delivered as a Resource Person - 1
Articles (I.S.B.N. & I.S.S.N.) - 15
Publications (I.S.B.N.) - 11

1. मीमांसानिबन्धसंग्रह:
2. मीमांसातन्त्रबालबोधिनी
3. दीपिकामयूख: -१
4. दीपिकामयूख: -४
5. अर्थविवृति:
6. न्यायमालाविवृति:
7. मीमांसामकरन्द:
8. मीमांसादर्शनम्, शिक्षादर्शनञ्च
9. मीमांसार्थप्रकाश:
10. मीमांसाशास्त्रप्रवेशिनी, भाग: - १
11. मीमांसाशास्त्रप्रवेशिनी, भाग: - २

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



ISBN : 978-81-937648-4-8

CC-0. In Public Domain. Cuddalore Collection. TN.